Teach Yourself Samskrit

संस्कृतस्वाध्यायः

प्रथमा दीक्षा

सम्भाषणम्

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय संस्कृत संस्थानम्
नव देहली

Teach Yourself Samskrit

संस्कृत-स्वाध्यायः

प्रथमा दीक्षा

सम्भाषणम्

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Publisher :

Prof. Vempaty Kutumba Sastry
Vice - Chancellor
Rashtriya Sanskrit Sansthan
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi - 110 058
Ph. : 011-25541949
Fax : 011-25541948
E-mail : rsks@nda.vsnl.net.in

First Edition	:	January	2002.	1000 Copies
First Reprint	:	August	2002.	4000 Copies
2nd Reprint	:	October	2003.	1000 Copies
3rd Reprint	:	November	2003.	30,000 Copies
4th Reprint	:	December	2003.	20,000 Copies
5th Reprint	:	March	2004.	50,000 Copies

ISBN : 81-86111-03-4

All rights reserved. No re-production or translation of this book or part thereof in any from, should be made. Neither it may be stored in a retrieval system, or transmitted by any means, electronic mechanicals, photocopying, recording or otherwise, without the written permission of the publisher.

© Rashtriya Sanskrit Sansthan

Price : Rs. 200.00 (Per Set)

Printer :
Graphic World
Graphics & Print Services
1659-62 Dakhni Rai Street,
Darya Ganj, New Delhi - 110002

संस्कृतस्वाध्यायः

प्रथमा दीक्षा

मार्गदर्शकसमितिः

प्रो० श्रीधर वसिष्ठः
श्री चमू. कृष्णशास्त्री
श्रीमती शशिप्रभा गोयल
डा० विश्वासः

प्रो० के.वि. रामकृष्णमाचार्यः
डा० चाँद किरण सलूजा
श्री जनार्दन हेगडे
डा० रा. देवनाथन्

सहसम्पादकाः

ललित कुमार त्रिपाठी
वाई.एस. रमेशः
सुकान्त कुमार सेनापतिः
वनमाली बिश्वालः

सहयोगिनः

चित्रकारः - कल्लोल मजूमदार
चित्रसज्जाकारौ- ब्रह्म बसेटिया
विजय बसेटिया

सहचित्रकारः - भास्कर सिन्हा
अक्षरसंयोजकः - जवाहर लाल गुप्त

विषयानुक्रमणी

क्रमांकः	शीर्षकम्	पृष्ठ संख्या
१.	शाकापणः	१
२.	संस्कृतकक्ष्या-I	२-३
३.	गृहिण्योः सम्भाषणम्-I	४
४.	गृहिण्योः सम्भाषणम्-II	५
५.	माता-पुत्रयोः सम्भाषणम्-I	६
६.	मित्राणां गृहागमनम्	७-८
७.	अध्यापकमित्रयोः सम्भाषणम्	९
८.	मित्रयोः सम्भाषणम्	१०
९.	कुटुम्बजनाः	११
१०.	दूरवाण्या मित्रसम्भाषणम्	१२
११.	अधिकारी	१३
१२.	पिता-पुत्रयोः सम्भाषणम्	१४
१३.	कक्ष्यायां छात्राणां सम्भाषणम्	१५
१४.	वार्षिकोत्सवः	१६
१५.	देहलीं गमिष्यामः	१७
१६.	संस्कृतकक्ष्या-II	१८
१७.	अनुमतिः	१९
१८.	सख्याः आगमनम्	२०
१९.	प्रश्नोत्तरम्	२१
२०.	बाल्यकालस्मरणम्	२२
२१.	वार्षिकोत्सवसंरम्भः	२३
२२.	पुत्राभ्यां सह जनन्याः सम्भाषणम्	२४-२५
२३.	मातापुत्र्योः सम्भाषणम्	२६
२४.	शाटिका आवश्यकी	२७

२५. नूतना लेखनी २८
२६. प्रीत्या व्यवहरतः २९
२७. पाठनं रोचते ३०
२८. यथा वदति तथा कुर्मः ३१
२९. पूजा ३२
३०. तं जानन्ति वा भवन्तः ३३
३१. गृहिण्योः सम्भाषणम्-III ३४
३२. शुभयात्रा ३५
३३. कार्यविवरणम् ३६
३४. विवाहात्परम् ३७
३५. पदकथनक्रीडा ३८
३६. अधिकं प्राप्तवान् ३९
३७. चित्ररचना ४०
३८. यदि ज्वरः तर्हि गुलिके ४१
३९. संस्कृतसम्भाषणम् ४२
४०. बेङ्गलूरुनगरे अनुभवः ४३
४१. किञ्चित् पाठयतु ४४
४२. रम्या प्रदर्शिनी ४५
४३. अपेक्षाः पूरयिष्यति ४६
४४. शिल्पकारः ४७
४५. पीतवर्णः ४८
४६. मम पतिः भोः ४९
४७. देहलीदर्शनम् ५०
४८. वार्षिकोत्सववर्णनम् ५१
४९. यात्राचिटिकारक्षणम् ५२
५०. परीक्षायै सज्जता ५३
५१. कार्यकर्तृगृहम् ५४
५२. उदरवेदना ५५
५३. यात्रावर्णनम् ५६
५४. स्वादिष्टं भोजनम् ५७
५५. आम्रशलाटुकर्त्तनम् ५८

५६.	युवकमण्डले सम्मानः	५९
५७.	क्षम्यताम्	६०
५८.	मित्रसाहाय्यम्	६१
५९.	परिचयपाठः	६२-६३
६०.	क्रीडा अपि आवश्यकी	६४
६१.	मातुलः आगमिष्यति	६५
६२.	निश्चिन्ता भविष्यामि	६६
६३.	सः वा?	६७
६४.	लोकहितं करोतु	६८
६५.	मित्रयोः सम्भाषणम्	६९
६६.	जनभाषा संस्कृतम्	७०
६७.	कार्यक्रमः	७१
६८.	मातापुत्रयोः सम्भाषणम्	७२

शाकापणः

आवश्यकम् - पर्याप्तम्
मास्तु - स्वीकरोतु

आपणिकः – आगच्छतु! किम् आवश्यकम् ?

महिला – एतस्य कूष्माण्डस्य एककिलोपरिमितस्य कति रूप्यकाणि ?

आपणिकः – तस्य किलोपरिमितस्य अष्टरूप्यकाणि।

महिला – अर्धकिलोपरिमितम् आलुकं ददातु।

आपणिकः – कूष्माण्डः मास्तु वा ?

महिला – किलोद्वयमितं कूष्माण्डं, एककिलोपरिमितं गृञ्जनकम्, अर्धकिलो महामरीचिकां च ददातु। वृन्ताकम् अपि एककिलोपरिमितम्। विण्डीनकानि नष्टानि खलु? उत्तमानि न आनीतवान् किम्?

आपणिकः – उत्तमानि विण्डीनकानि स्यूते एव सन्ति। आवश्यकं किम् ?

महिला – किलोमात्रपरिमितं ददातु। आहत्य कतिरूप्यकाणि इति वदतु शीघ्रं गन्तव्यम्।

आपणिकः – आहत्य पञ्चसप्ततिरूप्यकाणि। कारवेल्लं मास्तु वा ?

महिला – तिक्तम् इत्यतः कारवेल्लं मम गृहे न खादन्ति। पर्याप्तम्। अस्मिन् स्यूते सर्वाणि स्थापयतु। धनं स्वीकरोतु।

आपणिकः – परिवर्तः नास्ति किम्? अस्तु स्वीकरोतु।

संस्कृतकक्ष्या-I

एषः	एतौ	एते
सः	तौ	ते
त्वं	युवां	यूयम्
अहम्	आवां	वयम्

आचार्यः – एषः कः ?

शिष्यः – एषः कुम्भकारः।

आचार्यः – एषः किं करोति ?

शिष्यः – सः घटं करोति।

आचार्यः – सः कीदृशं घटं करोति?

शिष्यः – सः स्थूलं घटं करोति।

आचार्यः – सः कया घटं करोति?

शिष्यः – सः मृत्तिकया घटं करोति।

आचार्यः – एतौ कौ?

शिष्यः – एतौ तन्तुवायौ।

आचार्यः – एतौ किं कुरुतः?

शिष्यः – एतौ वस्त्राणि वयतः।

आचार्यः – तौ कीदृशानि वस्त्राणि वयतः?

शिष्यः – तौ अमूल्यानि वस्त्राणि वयतः।

आचार्यः – तव कानि वस्त्राणि प्रियाणि?

शिष्यः – कार्पासीयानि वस्त्राणि मम प्रियाणि। मम मित्रस्य और्णं वस्त्रं प्रियम्।

आचार्यः – एते के?

शिष्यः – एते चित्रकाराः।

आचार्यः – एते किं कुर्वन्ति?

शिष्यः – एते सुन्दराणि चित्राणि लिखन्ति।

आचार्यः – ते के?

शिष्यः – ते हरिणाः।

आचार्यः – ते किं कुर्वन्ति?

शिष्यः – ते हरितानि तृणानि खादन्ति।

आचार्यः – त्वं किं करोषि?

शिष्यः – अहं साहित्यं पठामि।

आचार्यः – युवां किं कुरुथ?

शिष्यः – आवां गीतं गायावः।

आचार्यः – यूयम् अद्य पठितान् शब्दान् स्मरत।

शिष्याः – तथैव श्रीमन्।

गृहिण्योः सम्भाषणम्-I

तृतीया विभक्तिः

मालती – शारदे! किं करोति भवती?

शारदा – अहो मालति! आगच्छतु, उपविशतु। कुशलिनी किम्?

मालती – आम्, सर्वं कुशलम्। भवती स्वकार्यं करोतु। अहं तत्रैव अन्तः आगच्छामि।

शारदा – मम पाकः न समाप्तः। अद्य भोजनार्थं बान्धवाः आगच्छन्ति। अतः विशेषपाकः।

मालती – तर्हि किं किं करोति?

शारदा – आलुकेन क्वथितं करोमि। कूष्माण्डेन तेमनं करोमि।

मालती – बहु मरीचिकाः सन्ति खलु? मरीचिकया किं करोति?

शारदा – लघु मरीचिका कटुः, महामरीचिकया भर्जं करोमि।

मालती – कैः व्यञ्जनं करोति?

शारदा – विण्डीनकैः व्यञ्जनं करोमि। उर्वारुकेण 'किं करोमि' इति चिन्तयामि।

मालती – उर्वारुकं गृञ्जनकं च योजयित्वा कोषम्भरीं करोतु भोः। बहु स्वादिष्टं भवति।

शारदा – तथैव करोमि। पायसमपि करोमि। पर्पटान् अपि भर्जयामि। मम पतिः बहु इच्छति।

मालती – अहमपि किञ्चित् साहाय्यं करोमि।

शारदा – मास्तु भो! भवती उपविशतु मया सह सम्भाषणं करोतु। अहं सर्वं करोमि।

मालती – तर्हि अहं सर्वेषां रुचिं पश्यामि। सर्वं भवती करोतु।

गृहिण्योः सम्भाषणम्-II

आसीत्	आसन्
आसम्	आस्म

शीला – हरिः ओम् गीते! अस्ति किं गृहे ?

गीता – ओः शीले ! किं भोः दर्शनमेव दुर्लभम् ? कुत्र गतवती आसीत् ?

शीला – कुत्रापि न गता अहम्। गृहे एव आसम्। पञ्चदशदिनेभ्यः बहूनि कार्याणि। भवती अपि न आगतवती खलु ?

गीता – अहं, मम भगिनीपरिवारः, मम पुत्री च तिरुपतिं गतवन्तः आस्म। तत्र अस्माकं गृहस्य पूजा आसीत्। तत्र तु जनानां सम्मर्दः एव आसीत्। तत्सर्वं समाप्य ह्यः एव आगताः।

शीला – मम गृहे पुरातनानि कानिचित् भग्नानि नष्टानि च वस्तूनि आसन्। तानि विक्रीय अन्यानि नूतनानि वस्तूनि आनीतवन्तः स्मः तदेव कार्यम्।

गीता – तद्दिने आपणगमनसमये मार्गे भवत्याः पुत्रः मिलितवान् आसीत्। सः उक्तवान् यत् मम जनन्याः गृहे बहूनि कार्याणि इति।

शीला – स्वीकरोतु प्रसादम्। सुशीला अपि नास्ति नगरे इति मन्ये।

गीता – सा तु नगरे एव अस्ति। ह्यः मम गृहम् आगता आसीत्।

शीला – एवम् ! आगच्छतु सा, सम्यक् तर्जयिष्यामि ताम्।

गीता – अहम् आगच्छामि। अद्य मम गृहं प्रति मम माता आगच्छति। सा षट्दिनानि अत्रैव वासं करिष्यति। अतः सप्ताहं यावत् नागच्छामि।

शीला – तिष्ठतु भोः। सर्वदा भवत्याः त्वरा। किञ्चित् तिष्ठतु।

गीता – नैव, भवती अन्यथा मा चिन्तयतु। आगच्छामि पुनः।

शिला – अस्तु, तर्हि पुनर्मिलावः।

माता-पुत्रयोः सम्भाषणम्-I

द्वितीया विभक्तिः
लोट् म०पु०एक व०

माता – गोविन्द ! किं करोषि त्वम् ?

गोविन्दः – पाठं पठामि अम्ब !

माता – वत्स ! आपणं गत्वा आगच्छसि किम् ?

गोविन्दः – अम्ब ! शीघ्रं लिखित्वा गच्छामि। किम् आनयामि ततः ?

माता – वत्स ! आपणं गत्वा लवणं, शर्करां, तण्डुलं, गुडं द्विदलञ्च आनय।

गोविन्दः – भगिनीं वदतु अम्ब ! सा किं करोति ?

माता – सा अवकरं क्षिप्त्वा पात्रं प्रक्षालयति। द्रोण्यां जलं पूरयति। भूमिं वस्त्रेण मार्जयति। पुष्पाणि आनीय मालां करोति। एवं तस्याः बहूनि कार्याणि सन्ति भोः।

गोविन्दः – ममापि पठनं बहु अस्ति।

माता – दशनिमेषाभ्यन्तरे आपणं गत्वा आगच्छ। अनन्तरं पाठान् पठ।

गोविन्दः – तर्हि शीघ्रं धनं स्यूतं च ददातु अम्ब !

माता – आगमनसमये द्वौ कूर्चौ, अग्निपेटिके, संमार्जन्यौ च आनय।

गोविन्दः – द्वौ स्यूतौ ददातु, धनम् अधिकं ददातु,चाकलेहान् अपि आनयामि....?

माता – अतः एव भवान् शीघ्रं गन्तुम् उद्युक्तः। स्वीकुरु....।

मित्राणां गृहागमनम्

एतत् (पुं)/स्त्री/नपुं
एव/किञ्चित्

पुत्री – अम्ब ! मम मित्राणि आगतानि सन्ति, परिचयं कारयामि। आगच्छतु।

माता – आगतवती। सर्वेभ्यः नमस्कारः।

पुत्री – एषः रमेशः। एतस्य पिता वित्तकोषे कार्यं करोति।

माता – अत्र स्नेहा का ?

पुत्री – सा नागतवती। तस्याः अम्बायाः अस्वास्थ्यम् अस्ति। एषा दिव्या, अस्माकं गृहसमीपे एव वसति।

माता – एतस्याः अम्बाम् अहं जानामि। सा प्रतिदिनं राघवेन्द्रमन्दिरम् आगच्छति।

पुत्री – एषः आनन्दः। सर्वान् सदा आनन्दयति। कक्ष्यायाम् अपि सर्वत्र प्रथमं स्थानं प्राप्नोति।

माता – तं किरणं जानामि। किरण ! कथं मौनेन स्थितवान् भवान् ?

किरणः – मम किञ्चित् शिरोवेदना।

पुत्री – एषा मङ्गला, एषा राधा, एषा रोहिणी, एषा कविता, सा ज्योतिः।

माता – सः कः भोः, अन्ते उपविष्टवान्।

पुत्री – तस्य परिचयं वदामि, कुतः त्वरा ? सः एव अस्माकं मुख्यशिक्षकस्य पुत्रः गोपालः, अस्माकं गणप्रमुखः। तस्य गुणकीर्तनं कर्तुम् एकं दिनं न पर्याप्तम्।

माता – अलम् अतिविस्तरेण।

पुत्री – अम्ब ! भवती केवलं वचनेन एव मम मित्राणि प्रेषयति उत किमपि खादितुं ददाति ?

माता – अस्तु, भवती अस्माकं गृहं दर्शयतु, तावता अहं खाद्यं सज्जीकरिष्यामि।

पुत्री – मित्राणि ! एषा मम माता अन्नपूर्णा। साक्षात् अन्नपूर्णेश्वरी। आगच्छन्तु, गृहं सर्वं दर्शयामि।

एषः मम अध्ययनप्रकोष्ठः, एषा पाकशाला, दूरतः एव पश्यन्तु, यतः अन्तः प्रवेशः अनुमतिं विना नास्ति। एतत् प्रार्थनामन्दिरम्। वयं सर्वे प्रातः सायं च मिलित्वा प्रार्थनां कुर्मः। एषः विशालः सभामण्डपः। अत्रैव विशेषदिनेषु कार्यक्रमः भवति। एवम् अस्माकं लघु गृहं, सुव्यवस्थितगृहम्।

आगच्छन्तु उपाहारं स्वीकुर्मः।

अध्यापकमित्रयोः सम्भाषणम्

एतौ	-	*एते*
एते	-	*एताः*
ते	-	*ताः*
तौ	-	*ते*

प्रमोदः – नमस्ते श्रीकान्त ! आगच्छतु उपविशतु।

श्रीकान्तः – संस्कृतपाठः प्रचलति किम् ? एताः किं कुर्वन्ति ?

प्रमोदः – एताः चित्रं दृष्ट्वा प्रश्नान् लिखन्ति। ते अर्धकथां पूर्णां कुर्वन्ति।

श्रीकान्तः – एतौ कौ ?

प्रमोदः – एतौ मम साहाय्यं कुरुतः। एते बालिके सुन्दरतया लिखतः।

श्रीकान्तः – भोः बालकाः, सुन्दरं लिखन्तु। त्वरा मास्तु।

प्रमोदः – ते चित्रं दृष्ट्वा सम्भाषणं लिखतः। तौ एकां कथां लिखतः। ताः बालिकाः पदबन्धान् रचयन्ति। एते बालकाः प्रश्नानाम् उत्तराणि लिखन्ति।

श्रीकान्तः – अन्ते उपविष्टवन्तौ तौ किं कुरुतः ? युवां किं कुरुथः ?

छात्रौ – आवां चित्रे वर्णं योजयावः।

प्रमोद – भोः छात्राः ! यूयं शीघ्रं समापयथ। इदानीं क्रीडा अस्ति।

छात्राः – वयं शीघ्रं-शीघ्रं लिखामः आचार्य !

मित्रयोः सम्भाषणम्

सह-विना

शिशिरः – अखिल ! कोऽपि नास्ति किं गृहे ?

अखिलः – अहम् एकः एव अस्मि। पिता अम्बया सह सङ्गीतकार्यक्रमं गतवान्। अग्रजा अरुणया सह चित्रमन्दिरं गतवती। अनुजः बालैः सह क्रीडति।

शिशिरः – भवन्तं विना सर्वेऽपि गतवन्तः। भवान् मया सह आगच्छतु। मम माता आपणं गत्वा पुष्पाणि आनयतु इति उक्तवती। अहं स्यूतेन विना एव आगतवान्।

अखिलः – चिन्ता मास्तु। अहं स्यूतं ददामि। धनेन विना आगतम् वा इति पश्यतु।

शिशिरः – तिष्ठतु। प्रथमं धनमस्ति वा इति पश्यामि। किञ्चित् जलं ददातु भोः।

अखिलः – स्वीकरोतु, तिष्ठतु काफीं करोमि। भवान् शर्करया विना काफीं पिबति उत शर्करया सह ?

शिशिरः – अहं शर्करया सह एव पिबामि। किन्तु मास्तु, इदानीं भवतः किमर्थं क्लेशः ?

अखिलः – क्लेशः नास्ति। ममापि काफीसमयः एषः, तिष्ठतु, मया सह काफीं पिबतु।

कुटुम्बजनाः

लोट्,–सम्बोधनप्रथमा

माता – राधे ! पुनीत ! शीघ्रम् उत्तिष्ठताम्।

राधा – अम्ब ! किमर्थं शीघ्रम् ? अद्य रविवासरः खलु ?

माता – शीघ्रं दन्तधावनं कुरुताम्। स्नानमपि समापयताम्। अद्य जनकस्य जन्मदिनम्।

पुनीतः – अम्ब ! कः उपाहारः ?

माता – अद्य उपाहारः अनन्तरम्। प्रथमं सर्वे देवालयं गच्छाम।

पुनीतः – अम्ब उष्णं जलं सज्जीकरोतु। अहं स्नानं करोमि।

पिता – नलिनि ! क्षीरार्थं पात्रम् आनयतु। शीघ्रं काफी करोतु।

माता – भो ! वार्तापत्रिकाम् अनन्तरं पठतु। शीघ्रं सिद्धः भवतु।

राधा – अम्ब ! महती बुभुक्षा। क्षीरं ददातु।

माता – वत्से ! क्षीरं स्वीकुरु। तदनन्तरं नूतनवस्त्रं धर।

पुनीतः – अम्ब ! ममापि नूतनवस्त्रं ददातु।

पिता – नलिनि ! पूजार्थं सर्वं स्वीकरोतु। गच्छाम वा?

माता – पुनीत ! राधे ! द्वौ अपि देवं नमस्कुरुताम्। भोः ! आगच्छतु ! आवां तत्र गच्छाव।

राधा – तात ! घण्टा उपरि अस्ति। अहं कथं वादयामि ?

पुनीतः – किञ्चित् कूर्दनं कुरु।

माता – पुनीत ! त्वं चेष्टां मा कुरु। सा रोदिति।

पिता – भोः अर्चक ! एकाम् अर्चनां करोतु।

माता – भवान् एव प्रसादं स्वीकरोतु।

पिता – पूजा समाप्ता। आगच्छन्तु गच्छाम।

दूरवाण्या मित्रसम्भाषणम्

वर्तमाने लट्

गिरीशः – हरिः ओम्।

अनन्तः – हरिओम्। कः वदति?

गिरीशः – अहं गिरीशः वदामि। मित्र ! गृहे कोऽपि नास्ति किम् ?

अनन्तः – सर्वे सन्ति। पिता जपति। अम्बा पूजयति। अनुजः खादति। अग्रजा मालां करोति। पितामहः दूरदर्शनं पश्यति। पितामही स्नानं करोति।

गिरीशः – त्वं किं करोषि ? क्रीडसि वा ?

अनन्तः – अहं पठामि। उत्तरं लिखामि। तव अनुजौ किं कुरुतः ?

गिरीशः – मम अनुजौ शालां गच्छतः। अहं पिता च विद्यालयं गच्छावः।

अनन्तः – अद्य त्वमपि विद्यालयं न गच्छ? अहमपि न गच्छामि। वयं सर्वे अद्य मैसूरुनगरं गच्छामः। मम बान्धवाः अपि आगच्छन्ति।

गिरीशः – भवतः पिता कार्यालयं न गच्छति किम् ?

अनन्तः – अद्य मम पिता विरामं स्वीकरोति।

गिरीशः – अनन्तः नहि भोः। अहम् आगन्तुं न शक्नोमि। भवान् गच्छतु।

अनन्तः – पुनः मिलामः, धन्यवादः।

अधिकारी

अद्य/ह्यः
भूते क्तवतु

अधिकारी – सुधाकर ! शीघ्रं लिपिकारम् आह्वयतु।

सुधाकरः – अद्य लिपिकारः नागतवान्। 'सः हरिद्वारं गतवान्' इति।

अधिकारी – ह्यः वित्तकोषतः धनम् आनीतवान् किम् ?

सुधाकरः – आम्। ह्यः अहं रमेशः च वित्तकोषं गतवन्तौ। धनम् आनीतवन्तौ अपि।

अधिकारी – ह्यः सर्वे किं किं कार्यं कृतवन्तः ?

सुधाकरः – ह्यः रामगोपालः गणनां समापितवान् 'गीता पत्राणि लिखितवती' गौरीशः कार्याणि परिशीलितवान्। ह्यः चन्नम्मा नागतवती। मुकुन्दः स्वच्छीकृतवान्।

अधिकारी – चन्नम्मा कुत्र गतवती इति किं कोऽपि जानाति ?

सुधाकरः – चन्नम्मा तीव्रम् अस्वस्था इति शृणुमः।

अधिकारी – सा औषधं स्वीकृतवती स्यात् खलु?

सुधाकरः – वैद्यः सूच्यौषधं दत्तवान् इति श्रुतम्। ह्यः निवेदिता- विद्यालयस्य शिक्षिकाः आगतवत्यः। भवान् न आसीत्। अतः एकं पत्रं दत्तवत्यः।

अधिकारी – प्राचार्या मुख्याध्यापिका च किम् आगतवत्यौ ?

सुधाकरः – नैव, केवलं प्राचार्या आगतवती। 'भवान् दूरवाणीं करोतु' इति उक्तवती।

अधिकारी – भवतु, भवान् गच्छतु।

पिता-पुत्रयोः सम्भाषणम्

सप्तमीविभक्तिः
भूते क्तवतु

पिता – आगच्छतु। यात्रा कथम् आसीत्?

शिवरामः – सम्यक् आसीत् तात !

पिता – भवान् कदा मुम्बईं प्राप्तवान् ?

शिवरामः – अहं सोमवासरे प्रातः ७ वादने एव प्राप्तवान्।

पिता – अनन्तरं भवान् किं किं कृतवान् ?

शिवरामः – ततः मित्रस्य गृहं गतवान्। तत्रैव स्नानमपि कृतवान्। उपहारं खादितवान्। ततः कुवेम्पु मन्दिरं गतवान्।

पिता – किं भवान् एकः एव गतवान् ?

शिवरामः – नैव, मम मित्रम् अहं च गतवन्तौ। कार्यक्रमः न आरब्धः आसीत्। समये आवां प्राप्तवन्तौ।

पिता – तदनन्तरम्....?

शिवरामः – कार्यक्रमः दशवादने आरब्धः। श्यामला प्रार्थनां गीतवती। स्वागतानन्तरं मम भाषणम् आसीत्। अहं भाषणं कृतवान्। अध्यक्षः मां श्लाघितवान्। जनाः उच्चैः हर्षोद्गारं कृतवन्तः। करताडनमपि कृतवन्तः। अधिकारी आगामिवर्षे अपि सम्मेलनं प्रति आगमनाय प्रार्थितवान्। ११:३० वादने कार्यक्रमः समाप्तः। अन्ते महिलाः 'वन्दे मातरं' गीतवत्यः।

पिता – पुनः मित्रस्य गृहं किं न भवान् गतवान् ?

शिवरामः – कुवेम्पुमन्दिरतः तस्य गृहं बहु दूरे अस्ति। अतः अहं साक्षात् याननिस्थानकं गतवान्। तत्र मम वयस्यौ मिलितवन्तौ। बहुकालं वयं सम्भाषणं कृतवन्तः ततः मध्याह्ने ३वादने अहं प्रस्थितवान्।

पिता – अस्तु ! स्नानं करोतु ! भोजनं करोतु ! कञ्चित्कालं विश्राम स्वीकरोतु।

शिवरामः – अस्तु ! तात।

कक्ष्यायां छात्राणां सम्भाषणम्

श्वः/परश्वः
लृट्

प्रदीपः – अरुण ! भवतः गणितपुस्तकं ददाति किम् ?

अरुणः – भवान् किमर्थं विद्यालयं नागतवान् ?

प्रदीपः – मम अतीव शिरोवेदना आसीत्। अतः शयनं कृतवान्।

अरुणः – इतिहासपुस्तकं भवान् इतोऽपि न दत्तवान्। इदानीं गणितपुस्तकमपि नयति। कदा प्रतिददाति ?

प्रदीपः – श्वः सायङ्काले भवतः पुस्तकं दास्यामि।

ज्योतिः – प्रदीप ! भवान् असत्यं वदति किम् ? श्वः भवान् बन्धुगृहं गमिष्यति। परश्वः आगमिष्यति। कदा गणितं लेखिष्यति ?

प्रदीपः – अहं विस्मृतवान्। परश्वः निश्चयेन पुस्तकं दास्यामि।

कृष्णः – ज्योति ! अद्य मम गृहम् आगच्छतु। सम्यक् पठिष्यावः।

अरुणः – भवान् पठिष्यति, लेखिष्यति इति वदति केवलम्।

कृष्णः – माला शिक्षिका श्वः संस्कृतपाठं लेखिष्यति। द्वितीयपाठस्य प्रश्नान् प्रक्ष्यति। रिक्तस्थानानि पूरयन्तु इति दास्यति। अतः बहु पठिष्यामि।

अरुणः – भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा पठिष्यामः।

ज्योतिः – भवन्तौ द्वौ अपि मिलतः चेत् न पठिष्यतः, युद्धं करिष्यतः। अतः स्वगृहे एव पठन्तु।

वार्षिकोत्सवः

अस्ति	स्तः	सन्ति
असि	स्थः	स्थ
अस्मि	स्वः	स्मः

पुत्री – अम्ब ! महती बुभुक्षा अस्ति।

माता – सुधे ! किमर्थं त्वरा ?

पुत्री – मम विद्यालये वार्षिकोत्सवः अस्ति। तत्र नाटकं, गीतं, नृत्यं, भाषणम् इत्यादि कार्यक्रमाः सन्ति।

माता – भवती वार्षिकोत्सवे किं करोति ?

पुत्री – वृन्दगाने अहम् अस्मि। मम सखी नृत्ये अस्ति। बालकाः केवलं नाटके सन्ति। वयं बालिकाः पुनः यष्टिक्रीडायाम् अपि स्मः। द्वौ बालकौ विनोदनाटके स्तः।

माता – निपुणा खलु मम पुत्री।

सखी – सुधे ! कुत्र असि ?

पुत्री – अत्र अस्मि। किम् वदतु।

सखी – भवती अद्य कदा विद्यालयं गच्छति।

पुत्री – किमर्थम् ? भवती अपि आगच्छति वा ?

माता – युवां मिलित्वा कस्मिन्नपि कार्यक्रमे न स्थः वा ?

पुत्री – आवां द्वे अपि वृन्दगाने यष्टिक्रीडायाम् च स्वः।

पिता – पुत्रि ! किं कुर्वन्ति मिलित्वा ?

माता – अद्य पुत्र्याः विद्यालये वार्षिकोत्सवः अस्ति। वयं शीघ्रं गत्वा पुरतः उपविशामः।

देहलीं गमिष्यामः

भविष्यत्

गिरिजा – विरामसमये कुत्रापि प्रवासं करिष्यामः।

पतिः – आगामिसप्ताहे मम कार्यालयतः पञ्चजनाः नवदेहलीं गमिष्यन्ति इति श्रूयते। वयमपि तैः सह गमिष्यामः।

गिरिजा – देहल्यां कुत्र वासं करिष्यामः ?

पतिः – ते सर्वेऽपि धर्मशालायां वासं करिष्यन्ति। भोजनम् उपाहारमन्दिरे करिष्यामः।

अजितः – तात ! श्वः आरभ्य मासं यावत् विरामः अस्ति। वयमपि प्रवासार्थं गमिष्यामः।

पतिः – आगामिसप्ताहे प्रवासः भविष्यति। चिन्ता मास्तु।

माता – पुत्रौ उष्णजलं पास्यतः। तत् कथं नेष्यामः।

पिता – समीचीनं जलं मार्गे अपि भविष्यति, तत् वयं क्रेष्यामः।

माता – खाद्यानि वयं प्रथमम् एव क्रेष्यामः। देहल्याम् अतिशैत्यम्। अतः अधिकानि वस्त्राणि स्वीकरोतु।

पुत्री – तत्र गन्तुं कः चिटिकाः क्रेष्यति ?

पिता – अहं चिटिकाः आनेष्यामि।

पुत्री – अग्रज ! त्वं कुत्र उपवेक्ष्यसि ?

अजित – अहं वातायनपार्श्वे उपवेक्ष्यामि।

माता – युवां मम पार्श्वे उपवेक्ष्यथः। गमनसमये निद्रां करिष्यथः।

पुत्री – एवं समीचीनम्। तथैव उपवेक्ष्यावः।

संस्कृतकक्ष्या-II

चतुर्थी

छात्राः – अहो ! किम् अद्य कक्ष्यायां बहूनि चित्राणि सन्ति। गजाः सन्ति। वृषभाः सन्ति। वृक्षाः सन्ति। पर्वताः सन्ति। फलानि सन्ति। पुष्पाणि सन्ति। नद्यः सन्ति। बालिकाः नृत्यन्ति।

आचार्या – सर्वे आगतवन्तो वा ?

छात्राः – आम् सर्वे आगतवन्तः।

आचार्या – अद्य एतानि चित्राणि सन्ति खलु। अहं सर्वेभ्यः ददामि। यस्य नाम वदामि सः उत्तिष्ठतु। फलचित्रं प्रभाकराय ददामि। नदीचित्रं लतायै ददामि। वृक्षचित्रं एतस्मै बालकाय ददामि। पर्वतचित्रं भारत्यै ददामि।

रञ्जिता – मान्ये ! मह्यं गजचित्रं ददातु।

दिनेशः – तस्यै वृषभचित्रं ददातु। गणेश ! तुभ्यं बालिकाचित्रं आचार्या दत्तवती वा ? मान्ये ! मह्यं फलचित्रं मास्तु फलमेव ददातु।

आचार्या – चित्रायै किमपि न ददामि। सा कोलाहलं करोति।

चित्रा – अहं कोलाहलं न करोमि।

आचार्या – अस्तु ! स्वीकरोतु। भवन्तः सर्वे स्व-स्व चित्राणि पश्यन्तु। पञ्च-पञ्च वाक्यानि संस्कृत भाषया लिखन्तु।

अनुमतिः

सप्तमी/तसिल्

प्रकाशः – अम्ब ! मम विद्यालये प्रवासः अस्ति। १५० रूप्यकाणि एकस्य। अहम् अपि गच्छामि वा ?

माता – अहं कथं वदामि ? पिता खलु धनं ददाति ?

प्रकाशः – भवती एव वदतु तातम्।

माता – कुत्र प्रवासः ?

प्रकाशः – प्रथमं विद्यालयतः पक्षिधाम गत्वा वस्तुप्रदर्शनालयं गच्छन्ति। तत्रैव उपाहारं खादित्वा उद्यानं गच्छन्ति। उद्याने क्रीडित्वा मन्दिरं गच्छन्ति। मन्दिरे श्लोकम् उक्त्वा भोजनालयं गच्छन्ति।

माता – कति छात्राः गच्छन्ति भोः ?

प्रकाशः – मम कक्ष्यायां सर्वेऽपि गच्छन्ति। ते सर्वे धनमपि दत्तवन्तः। इतः परम् अहम् एकाकी तातं पृष्ट्वा धनं ददामि।

माता – श्वः एव तातं पृष्ट्वा, धनं नयतु।

प्रकाशः – अम्बायाः अनुमतिः प्राप्ता। अर्धं कार्यं समाप्तम्।

पिता – वत्स ! कस्मिन् विषये अनुमतिः ?

प्रकाशः – तात ! मम विद्यालये प्रवासार्थं पक्षिधाम गच्छन्ति। अतः १५० रुप्यकाणि एकस्य।

पिता – सर्वे गच्छन्ति खलु। सर्वैः सह मिलित्वा गच्छतु। वस्तुप्रदर्शनालयं सम्यक् पश्यतु।

प्रकाशः – धन्यवादः तात ! श्वः धनं नेष्यामि।

सख्याः आगमनम्

किं, कदा, कुत्र?
कुतः कथम्?
किमर्थम् कति?

सुनीता – अहो ! चिरात् दर्शनम् ? आगच्छतु उपविशतु।

सुशीला – किं भगिनि ! बहुदिनेभ्यः आगच्छामि इति चिन्तितवती। रघुवीरः नास्ति किम् ?

सुनीता – वाणी अपि आगतवती किम्? कुशलं वा ? पातुं किं ददामि ?

सुशीला – मास्तु भगिनि ! विवाहगृहात् आगतवती अहम्। कथमस्ति भवत्याः स्वास्थ्यम् ?

सुनीता – चिन्ता नास्ति। इदानीं किञ्चित् उत्तमम् अस्ति।

रघुवीरः – कदा आगतवती भवती ? वाणी कुशलिनी वा ?

सुशीला – दशनिमेषेभ्यः पूर्वम् आगतवती। वाणी कुशलिनी अस्ति। भवान् कुतः आगतवान् ?

रघुवीरः – अद्य अस्माकं कार्यालये कश्चन कार्यक्रमः आसीत्। ततः आगतवान् किम् आदित्यः नागतवान् ? कुत्र गतवान् ?

सुशीला – सः किञ्चित् विलम्बेन आगच्छति। तस्य कार्यालयकार्यं बहु अस्ति इति।

सुनीता – भगिनि ! भवती पूजादिने किमर्थं नागतवती ?

सुशीला – तस्मिन् दिने पुत्र्याः बहु अस्वास्थ्यम् आसीत्। अतः नागतवती। तद्दिने कति जनाः आगतवन्तः ?

सुनीता – प्रायः ३० जनाः आगतवन्तः।

रघुवीरः – सुनीते ! केवलं वचनेन एव समापयति उत किञ्चित् किमपि ददाति ?

सुनीता – अहम् इदानीमेव आनयामि। भवन्तः सम्भाषणं कुर्वन्तु।

प्रश्नोत्तरम्

लोट्

पिता – नलिनि ! अद्य भवत्याः सख्यः सन्ति खलु। अहं प्रश्नान् पृच्छामि। भवत्यः उत्तरं वदन्तु।

नलिनी – भवान् कष्टकरं प्रश्नं मा पृच्छतु। भोः आगच्छन्तु। वयमेव जयं प्राप्नुमः। तात ! अन्ते उपायनं किमपि ददातु।

पिता – प्रथमः प्रश्नः-अहं कन्दुकम् उपरिक्षिपामि। किमर्थं सः अधः पतति ? माया वदतु।

माया – कन्दुकं ग्रहणार्थं तत्र कोऽपि नास्ति। अतः अधः पतति।

पिता – समीचीनम्; रामः कृष्णस्य अनुजः। कृष्णस्य पिता शिवः रामस्य पिता कः ? गिरिजा वदतु।

गिरिजा – अहो तावदपि न जानाति वा ? रामस्य पिता दशरथः।

पिता – असमीचीनम्। एतस्य अङ्कः नास्ति।

नलिनी – किमर्थं तात !

पिता – अहो ! अहमिदानीं रामायणस्य राम विषये न पृष्टवान्। स्मरति ? भवतु अन्यः प्रश्नः। स्पर्धायाः अन्ते कः कार्यक्रमः अस्ति ? अथवा स्पर्धायाः अन्ते कः किं ददाति ?

माया – एतस्य उत्तरं नलिन्याः पिता एव जानाति।

पिता – कः अर्थः ? विस्तरेण वदतु।

नलिनी – एषा अपि स्पर्धा न वा ? भवान् किं ददाति ?

माया – भवान् नलिन्याः पिता अस्ति। भवान् एव सुन्दरं उपायनं दास्यति।

पिता – या पञ्चप्रश्नानामुत्तरं सम्यक् वदिष्यति तस्यै अहम् एकां सुन्दरीं पाञ्चलिकां दास्यामि।

बाल्यकालस्मरणम्

स्म

विजयः – विनय! सप्ताहात् पूर्वं परीक्षिताचार्यः स्वर्गस्थः इति वार्ता।

विनयः – एवं वा ? बहु वृद्धः आसीत् सः। बहु शास्त्राणि जानाति स्म। सम्यक् पाठयति स्म आचार्यः।

विजयः – किन्तु भवान् तु न पठति स्म।

विनयः – तदा तु बाल्ये वयं विद्यालयं न गच्छामः स्म। त्वमपि आम्रफलं खादसि स्म सदा। मम मित्राणि अपि अटन्ति स्म।

विजयः – सत्यम्। मम गृहे अपि भगिन्यौ अम्बां वदतः स्म। माता तर्जयति स्म। पिता तु कोपेन ताडयति स्म।

विनयः – किन्तु मम गृहे बहु न तर्जयन्ति स्म। अहं तु रात्रौ पठामि स्म। प्रथमां श्रेणीं प्राप्नोमि स्म।

विजयः – विनय ! ते प्रियङ्का मालविका च सदा कलहं कुरुतः स्म। स्मरति वा ? बहु विनोदः भवति स्म।

विनयः – एवम्, आवां ते द्वे अपि पीडयावः स्म। ते द्वे रोदनं कुरुतः स्म।

विजयः – भोः इदानीं पठावः, श्वः एव परीक्षा। बाल्यकालस्य दिनानि अतिमधुराणि। सर्वदा स्मरणयोग्यानि।

वार्षिकोत्सवसंरम्भः

च, भविष्यत्, एव

आचार्यः – श्वः वार्षिकोत्सवः भविष्यति खलु ? तन्निमित्तं सर्वसज्जताः अभवन् किम् ? भवान् वदतु विजय ! कः कः किं किं करिष्यति इति ?

विजयः – शङ्करः, राकेशः, विशाखः च सभायाः अलङ्कारं करिष्यन्ति। अमरः प्राणेशः च आसनव्यवस्थां द्रक्ष्यतः।

आचार्यः – मण्डपस्य अलङ्कारं के करिष्यन्ति ?

विजयः – उषा, तस्या सख्यः च मण्डपालङ्कारं करिष्यन्ति।

आचार्यः – दीपालङ्कारं के करिष्यन्ति ?

विजयः – नन्दीशः इत्यादयः दीपालङ्कारं करिष्यन्ति।

आचार्यः – मुख्यातिथिं कः आनेष्यति ?

विजयः – मुख्यातिथिम् अहमेव आनेष्यामि। मुरलिः तं प्रेषयिष्यति।

आचार्यः – अध्यक्षः स्वयमेव आगमिष्यति, उत कोऽपि तम् आनेष्यति ?

विजयः – अध्यक्षः स्वयमेव आगमिष्यति। प्रार्थनां रमा उषा च गास्यतः। मालार्पणम् अहं मुरलिः च करिष्यावः।

आचार्यः – श्वः कार्यक्रमः व्यवस्थितं यथा स्यात् तथा त्वं परिशीलयिष्यसि ननु ?

विजयः – तत्र सन्देहः एव मास्तु। वयं सर्वे सम्यक् कार्यक्रमं करिष्यामः।

आचार्यः – तर्हि श्वः मेलिष्यामि। अहं शीघ्रम् आगमिष्यामि।

पुत्राभ्यां सह जनन्याः सम्भाषणम्

चतुर्थी/तुमुन्

पुत्रः – अम्ब ! कोऽपि भिक्षुकः आगतवान्।

माता – भवान् एव तस्मै एकं नाणकं ददातु।

पुत्रः – अहं पठामि भोः, भवती एव भिक्षुकाय ददातु।

माता – भवते कार्यं न रोचते। अहमेव करोमि सर्वं कार्यम्।

पुत्रः – भिक्षुकः नाणकं नेच्छति। ओदनम् इच्छति।

माता – अहं भिक्षुकाय ददामि। भवान् जलं पूरयतु।

पुत्रः – जलं पूरयामि। खादितुं मह्यमपि किमपि ददातु।

माता – भवते भोजनमेव ददामि। पञ्चनिमेषान् तिष्ठतु।

पुत्रः – भोजनम् अनन्तरम्। प्रातः भगिन्यै भवती यत् दत्तवती तत् मह्यम् अपि ददातु।

माता – भवान् केवलं खादति, न पठति, न वा कार्यं करोति।

पुत्रः – अम्ब ! भवती भोजनं कृत्वा कुत्र गच्छति ?

माता – अहं सार्वजनिक पुस्तकालयं गच्छामि।

दीप्तिः – अम्ब ! माम् अपि पुस्तकालयं नयतु। अहं द्रष्टुम् इच्छामि।

माता – अस्तु अद्य दशवादने गच्छामः।

दीप्तिः – अम्ब ! एतानि पुस्तकानि किमर्थम् अत्र स्थापितवन्तः ?

माता – केचन पुस्तकानि द्रष्टुम् इच्छन्ति। केचन क्रेतुम् इच्छन्ति। क्रेतुं ये इच्छन्ति ते केवलं बहिः पुस्तकानि पश्यन्ति।

दीप्तिः – प्रबन्धं लेखितुम् अपि इतः पुस्तकानि नयन्ति किम् ?

माता – अत्र सर्वविधानि अपि पुस्तकानि भवन्ति। केचन कथापुस्तकं

पठितुम् इच्छन्ति। केचन भाषणं सज्जीकर्तुम् इच्छन्ति। अन्ये केचन बालकेभ्यः सङ्ग्रहीतुं शक्नुवन्ति। अतः सर्वाणि अपि पृथक् स्थापयन्ति।

दीप्तिः – अत्र पुस्तकानि स्वीकर्तुं किम् सदस्याः आगच्छन्ति ?

माता – आम् ! अत्र सा व्यवस्था समीचीना अस्ति। नूतनानि स्वीकर्तुं पुरातनानि पुस्तकानि प्रत्यर्पयितुं सदस्याः आगच्छन्ति।

दीप्तिः – तर्हि वयं सख्यः मिलित्वा अत्र आगच्छामः। अधिकान् विषयान् सङ्ग्रहीतुं शक्नुमः।

माता – अनुजमपि आनयतु। सोऽपि पुस्तकपठनाभ्यासं करिष्यति।

मातापुत्र्योः सम्भाषणम्

भूतकृदन्त-एकवचनरूपाणि (स्त्री०)

विजया – अम्ब ! अहम् आगतवती।

अम्बा – विजये किमर्थं विलम्बः ?

विजया – अद्य विद्यालये कोऽपि कार्यक्रमः आसीत्। तत्र भागं स्वीकृतवती।

अम्बा – भवती किं कृतवती ?

विजया – अहं गीतं गीतवती।

अम्बा – एवं.... ? अध्यापिका किम् उक्तवती ?

विजया – अध्यापिका सर्वान् श्लाघितवती। किन्तु राधा कोलाहलं कृतवती। ताम् एका तर्जितवती। सा रुदितवती।

अम्बा – अनन्तरम् .....।

विजया – परह्यः स्पर्धा आसीत् किल? तत्र नलिनी जयं प्राप्तवती। मुख्याध्यापिका पारितोषिकं दत्तवती। वय तत् दृष्टवत्यः।

अम्बा – भवतु, किमर्थं विलम्बः ? तत् न उक्तवती।

विजया – अहं तावत्पर्यन्तं घटीमेव न दृष्टवती। समयमेव न ज्ञातवती। अतः विलम्बः।

अम्बा – भवतु, अहम् अद्य मधुरं कृतवती। ददामि, भवती खादतु।

शाटिका आवश्यकी

वर्णाः

सुबोधा – ममते ! किं करोति भवती? आगच्छति किम्?

ममता – कुत्र गच्छसि?

सुबोधा – एका शाटिका आवश्यकी। भवती अपि आगच्छतु। आपणं गच्छावः।

ममता – किञ्चित् तिष्ठतु। आगच्छामि।

सुबोधा – मम मातुलस्य विवाहः अस्ति। अतः नूतनां शाटिकां क्रीणामि।

ममता – भवती कं वर्णम् इच्छति। भवत्याः नीलः वर्णः युज्यते।

सुबोधा – नैव। नीलवर्णस्य हरितवर्णस्य च शाटिका मम समीपे अस्ति। पाटलवर्णस्य पीतवर्णस्य वा इच्छामि। पश्यामः। तत्र।

ममता – कति रूप्यकाणां शाटिकां स्वीकरोति भवती?

सुबोधा – सामान्यतः ३०० रूप्यकाणाम्। ततोऽपि अधिकमूल्यस्य मास्तु। मम माता मम निमित्तम् एकाम् आनयति। सा श्वेतकृष्णवर्णयोः मिश्रिताम् एकां शाटिकां स्वीकृतवती।

ममता – भवत्याः रक्तवर्णस्य शाटिका बहु उत्तमा अस्ति भोः।

सुबोधा – किन्तु अहं तां न इच्छामि। अहं हरितवर्णस्य शाटिकां बहु इच्छामि।

ममता – अस्तु आपणे याम् इच्छति तां स्वीकरोतु।

नूतना लेखनी

किं कति
कुतः किमर्थम्

राकेशः – किं भोः, नूतना लेखनी वा ? कुतः आनीतवान् ?

श्रीशः – मम अग्रजः 'न्यूयार्कतः' आनीतवान्।

राकेशः – वेङ्कटेशः आगतवान् आसीत् किम् ? भवान् किमर्थं तं मम गृहं न आनीतवान् ?

श्रीशः – तस्य समयः एव नास्ति भोः। सः श्वः प्रातः गमिष्यति।

राकेशः – भवान् ह्यः किमर्थं विद्यालयं न आगतवान् ?

श्रीशः – ह्यः आवां द्वौ अपि नगरं गतवन्तौ। ततः बहूनि वस्तूनि आनीतवन्तौ। पश्यतु, एषा पेटिका अपि नूतना।

राकेशः – बहु सम्यक् अस्ति। एतस्याः कति रूप्यकाणि ?

श्रीशः – प्रायः ६५ रूप्यकाणि दत्तवान् इति चिन्तयामि।

राकेशः – श्वः मम गृहं प्रति लखनऊतः बान्धवाः आगमिष्यन्ति। एकः विवाहः अस्ति। तत्र सर्वे गच्छन्ति।

श्रीशः – तर्हि श्वः भवान् विद्यालयं नागमिष्यति ननु ?

राकेशः – अहं विवाहे न गच्छामि। लेखनं बहु अस्ति। अतः गृहे एव भविष्यामि। नूतनया लेखन्या लेखिष्यामि।

प्रीत्या व्यवहरतः

तृतीया/लोट्

आदित्यः – अचिन्त्य ! भवान् तत् पुस्तकम् आनयतु।

अचिन्त्यः – अहं न आनयामि। आवश्यकं चेत् नयतु।

आदित्यः – भोः, भवान् कदा सन्तोषेण वदति ? सदा कोपं करोति।

अचिन्त्यः – त्वमपि कदापि प्रीत्या न वदसि। आदेशं करोषि।

आदित्यः – सदा श्रद्धया कार्यं करोतु। विनयेन सम्भाषणं करोतु।

अचिन्त्यः – गच्छ त्वम्। सदा उपदेशं करोषि।

माता – किमर्थं कोपेन कलहं कुरुतः ? भवन्तौ सहोदरौ खलु ? आदित्य ! त्वं कोपेन मा तर्जय, सः दुःखेन रोदिति। कदा प्रीत्या व्यवहरतः।

आदित्यः – अम्ब ! क्षम्यताम्। इतः परं सन्तोषेण एव भवावः।

अचिन्त्यः – अम्ब ! अद्य मम विद्यालये एकः बालकः भयेन आक्रोशं कृतवान्। शिक्षिका प्रीत्या सान्त्वनां कृतवती। अनन्तरं सः आनन्देन, निर्भयेन पठितवान्।

माता – अस्तु, भवन्तौ अपि एकाग्रचित्ततया पठताम्, भक्त्या नमस्कारं कुरुताम्, परिश्रमेण उत्तम-अङ्कं प्राप्नुवताम्। तदा अहमपि सन्तोषेण भवामि।

आदित्यः – अस्तु अम्ब ! तथैव कुर्वः।

पाठनं रोचते

(रोचतेः-चतुर्थी)

मनोरमा – शिक्षिकायाः आगमनपर्यन्तं किञ्चित् पाठविषये एव चिन्तयामः। वदन्तु कस्मै/कस्यै किं रोचते ? इति।

शकुन्तला – मह्यं फलं रोचते। लता वदतु भोः।

रागिणी – मह्यम् आनन्दस्य नृत्यं रोचते। तुभ्यं किं रोचते वदतु कार्तिक !

कार्तिकः – कार्तिकाय नाटकवीक्षणं रोचते।

प्रशान्तः – मालत्यै सर्वदा निद्रा रोचते। न वा मालति ?

चूड़ामणिः – मह्यं संस्कृतगीतं रोचते। भोः आर्ये ! भवत्यै किं रोचते इति प्रथमं वदतु।

मनोरमा – एतस्यै किं रोचते इति कुतूहलं वा ? शृण्वन्तु, मह्यं भाषणं रोचते।

चेतनः – न सर्वे मौनेन उपविशन्तु। शिक्षिका आगतवती।

मदनः – आगच्छतु तस्यै किं रोचते इति पृच्छामः। मान्य ! भवत्यै किं रोचते इति वदति वा ?

शिक्षिका – मह्यं भवतां पाठनं रोचते।

यथा वदति तथा कुर्मः

द्वितीया

अध्यापकः – अखिलभारत-शिक्षक-सम्मेलनं भविष्यति। तत्र मनोरञ्जन कार्यक्रमान् कर्तुम् अवसरः अस्ति।

दीपकः – तर्हि वयम् एकं लघुनाटकं कुर्मः।

अर्चना – वयं सामूहिकगीतं गायामः।

अरुणः – अहम् एकपात्राभिनयं करोमि।

चेतनः – प्रदर्शिनी-आयोजनम् अस्ति वा?

अध्यापकः – महती प्रदर्शिनी भविष्यति। के तस्य कार्यं कुर्वन्ति?

अरविन्दः – वयं प्रदर्शिनीकार्यं कुर्मः। नूतनानि फलकानि लिखामः। बहूनि वस्तूनि सङ्गृह्णीमः। यन्त्रादीनि योजयामः। नवीनानि उपकरणानि रचयामः।

पल्लवी – आवां प्रार्थनां गायावः।

अध्यापकः – प्रबन्धकार्यं के निर्वहन्ति?

श्रीनिधिः – अस्माकं गणः प्रबन्धकार्यं निर्वहति। आसनस्थापनम्, अन्ते निष्कासनकार्याणि अपि अस्मदीयाः एव कुर्वन्ति।

अध्यापकः – कार्यक्रमस्यानन्तरं तथैव मौनं धावन्ति चेत्?

चिन्मयः – तथा न कुर्मः। यथा वदति तथैव कार्यं कुर्मः।

पूजा

पञ्चमी

श्रद्धा – लते ! लते ! किं करोति भवती ?

लता – आगच्छतु, आगच्छतु, कः विशेषः ? नूतनवस्त्रं धृतवती भवती।

श्रद्धा – मम गृहे श्वः पूजा अस्ति। भवती आगच्छतु। भोजनार्थम् आगच्छतु।

लता – अहमपि कार्ये साहाय्यं करोमि वस्तूनि कुतः आनयति ?

श्रद्धा – मधुराणि आपणतः आनयामि। पुष्पाणि फलानि च मम आर्यपुत्रः विपणितः आनयति। बान्धवा कदली-पत्राणि ग्रामतः प्रेषयन्ति। पूजावस्तूनि अर्चकः गृहतः एव आनयति।

लता – तिष्ठतु नलिकातः जलं स्रवति। आगच्छामि ?

श्रद्धा – भवत्याः गृहे जवनिकाः नूतनाः वा ? कुतः आनीतवती भोः ?

लता – मम पतिः प्रयागं गतवान् आसीत्। ततः जवनिकाः आनीतवान्। भवतु अहं किं कार्यं करोमि ? गृहतः शीघ्रम् आगच्छामि।

श्रद्धा – भवती शीघ्रम् आगच्छतु। तत्र किं कार्यम् इति पश्यामः। भवतु आगच्छामि।

लता – इतः कुत्र गच्छति ?

श्रद्धा – इतः मम गृहमेव गच्छामि। मम पतिः इदानीं कार्यालयतः आगच्छति। पुत्रः विद्यालयतः आगच्छति। विलम्बः अभवत्, गच्छामि।

तं जानन्ति वा भवन्तः

जानाति	*जानन्ति*
जानामि	*जानीमः*

कार्यकर्ता – हरिः ओम्, सुप्रभातम्।

गृहस्थः – हरिः ओम् उपविशतु, कः विशेषः ? वदतु।

कार्यकर्ता – वेङ्कटेशकुमारः इति कश्चन सङ्गणकतन्त्रज्ञः अस्ति। तस्य गृहम् भवति। तस्य गृहस या अत्र अस्ति। तं जानन्ति वा भवन्तः।

गृहस्थः – वेङ्कटेशः इति नाम श्रुतवान्। तस्य गृहसंख्यां वदतु।

कार्यकर्ता – अहं वेङ्कटेशं जानामि। तस्य गृहसंख्या १३०५ अस्ति। तस्य गृहम् इतः बहु समीपे अस्ति।

गृहस्थः – वीणे ! त्वं वेङ्कटेशं जानासि ? पश्यतु एतां संख्याम्।

वीणा – वेङ्कटेशः, १३०५ हाँ.... भोः भवान् अपि एतं जानाति। तस्य गृहम् एतस्य पृष्ठभागे अस्ति। अस्माकं कार्यालये सर्वेऽपि तं जानन्ति।

कार्यकर्ता – सः उक्तवान् यत् अत्र पृच्छतु। सर्वे मां जानन्ति, इति। सोऽपि समीचीन कार्यकर्ता।

गृहस्थः – इदानीं स्मृतवान्। तं वयं 'कुमार' इति आह्वयामः। अतः वेङ्कटेशः इत्युक्ते न स्मृतवान्। भवतु पानीयं किमपि स्वीकरोतु।

कार्यकर्ता – तर्हि किञ्चित् क्षीरं ददातु। वेङ्कटेशस्य गृहे एव अद्य उपाहारः।

वीणा – वयमपि तस्य गृहं गृहसदस्यान् च सम्यक् जानीमः। तदा तदा गच्छामः।

कार्यकर्ता – अस्तु, धन्यवादः, गच्छामि। तत्र सर्वे मम प्रतीक्षां कुर्वन्ति।

गृहिण्योः सम्भाषणम्-III

शृणोति शृण्वन्ति

सुनीता – अहो ! एषः भवत्याः पुत्रः सम्यक् गायति खलु। सङ्गीतकक्ष्यां गच्छति किम् ?

मधुरा – नैव तस्य भगिनी गृहे अभ्यासं करोति। सः श्रद्धया शृणोति। अतः गायति।

सुनीता – अहं सङ्गीतं बहु इच्छामि। कक्ष्यां गच्छतु इत्युक्ते मम पुत्री न शृणेति एव। किन्तु चलचित्रगीतानि सदा शृणेति।

मधुरा – मम गृहे सर्वेऽपि सङ्गीतप्रियाः ! अतः सर्वदा भक्तिगीतानि, भावगीतानि, भजनानि, सर्वाणि अपि शृणुमः।

सुनीता – मम गृहे अहम् एका एव गीतं शृणोमि। अन्ये सर्वे वार्तां शृण्वन्ति। चलचित्रगीतानि शृण्वन्ति, तावदेव।

मधुरा – गृहे अस्माकं वचनानि केऽपि न शृण्वन्ति। ते यथा इच्छन्ति तथा कुर्वन्ति।

सुनीता – किन्तु मम पार्श्वगृहे माता यत् वदति तत् सर्वेऽपि शृण्वन्ति, पालयन्ति च। किम् अन्यत् पतिः अपि सा यथा वदति तथा शृणोति, जानाति वा ?

मधुरा – केषुचित् गृहेषु मातुः वचनं गृहसदस्याः शृण्वन्ति। केषुचित् अन्ये यत् वदन्ति तत् माता शृणोति तावदेव।

शुभयात्रा

वासराः
भविष्यत्

पत्नी – सोमवासरे प्रत्यागमिष्यति खलु ?

पतिः – आम्, सोमवासरे प्रातः आगमिष्यामि। रविवासरे मम स्नेहितः सकुटुम्बम् आगमिष्यति।

पत्नी – पुत्रः सुनीलः शनिवासरे सायं चेन्नै गमिष्यति इति।

पतिः – भवतु, मङ्गलवासरे विवाहः अस्ति। अहं सोमवासरे प्रातः आगमिष्यामि खलु, सायं मिलित्वा विपणिं गमिष्यामः। मम स्नेहितमपि सूचयतु।

पत्नी – अहो ! अस्मिन् सप्ताहे बहु कार्यक्रमाः सन्ति। बुधवासरे रजन्याः विद्यालये वार्षिकोत्सवः। कार्यक्रमे तस्य भरतनाट्यम् अस्ति।

पतिः – चिन्तां मा करोतु भवती। तत्रापि गच्छामः। गुरुवासरे पूर्णतया विश्रान्तिः।

पत्नी – नास्ति भोः ! गुरुवासरे प्रतिवेशिन्याः गृहे कोऽपि विशेषः अस्ति। सा भोजनार्थमेव आहूतवती।

पतिः – भवतु, अन्यत् सर्वम् अनन्तरं चिन्तयिष्यामः। अहं तु इदानीं गच्छामि।

पत्नी – भवतः प्रयाणं सुखकरं भवतु।

पतिः – अयि ! 'शुभास्ते पन्थानः सन्तु' इति कालिदास-वचनं वदतु।

पत्नी – भवान् कालिदासः नैव खलु ?

कार्यविवरणम्

लट्

सतीशः – उत्पीठिकायाम् एकं पुस्तकम् अस्ति। कस्य पुस्तकं भोः ?

राजारामः – तत् वा ? गिरीशस्य पुस्तकम्। सः त्यक्त्वा गतवान् स्यात् ?

सतीशः – गिरीशस्य वा ? सः किं लिखितवान् पश्यामि एकवारम्।

१. लेखकस्य कार्यालयं गच्छामि

२. अनुजायै पत्रं लिखामि

३. प्रबन्धकेन सह चर्चां करोमि

४. यानपेटिकां क्रीणामि।

किमर्थं लिखितवान् एषः। राजाराम ! शृणोतु भवान् एषः किमपि लिखित्वा पुस्तकं पूरितवान्।

राजारामः – तस्य कार्यविवरणपुस्तकं भोः ! सः एव आगतवान् ददातु तस्मै।

सतीशः – गिरीश ! किं भवान् पुस्तके गृहपाठं लिखितवान् ?

गिरीशः – भवान् मम पुस्तकं किमर्थं स्वीकृतवान् ? अहं प्रतिदिनं कार्याणि लिखामि। अनन्तरं रात्रौ परिशीलयामि।

सतीशः – परिशीलनानन्तरम्.....।

गिरीशः – किं कार्यं कृतवान् किं न कृतवान् इति जानामि। अनन्तरदिने यत् न कृतवान् तत् प्रथमं समापयामि।

सतीशः – बहु उत्तमम्, अहमपि इतःपरं तथैव करोमि।

विवाहात्परम्

पञ्चमी/आनीतवान्

माता – विवाहः समाप्तः अस्ति। इतःपरम् आनीतानि वस्तूनि ददातु जगदीश !

जगदीशः – अम्ब ! अहम् ओङ्कारनिलयतः कटान् आनीतवान्। हरिनिवासतः महाजलपात्रम् आनीतवान्। मधुकृपातः चषकान् आनीतवान्। एतत्सर्वमपि अद्य यानेन नेष्यामि।

माता – ध्वनिमुद्रिकाःच१५ ध्वनिमुद्रिकाः कुतः भवान् ?

जगदीशः – केशवनिलयतः ध्वनिमुद्रिकाः आनीतवान्। विस्मृतवान् आसम्। ताः अपि अद्य नेष्यामि।

माता – प्रतिनिवेशिनिगृहतः अहं स्थालिकाः आनीतवान् खलु। ताः स्थालिकाः अहं प्रत्यर्पयिष्यामि।

जगदीशः – अम्ब ! शङ्करमठतः अहं कलशम् आनीतवान् खलु। तस्मै ददातु।

माता – शिशिरस्य गृहतः भवान् आच्छादकानि आनीतवान् खलु। तानि अपि प्रेषयामि किम् ?

जगदीशः – मास्तु, तानि वयमेव प्रत्यर्पयामः। अनुजं शिशिरगृहं प्रेषयतु।

माता – अस्तु भवान् सावधानं गच्छतु।

पदकथनक्रीडा

लोट्

आचार्या – भोः छात्राः ! अत्र, आगच्छत। मण्डलाकारेण उपविशत। क्रीडां क्रीडाम।

छात्राः – शीघ्रं शीघ्रम् आगच्छन्तु। अधिकसमयं यावत् क्रीडाम।

आचार्या – रमे ! त्वं पङ्क्तौ उपविश। भीम ! अग्रे आगच्छ। युवां किञ्चित् अपसरतम्।

प्रतीक्षा – आर्ये अहं कुत्र उपविशामि ?

आचार्या – त्वं किमर्थं विलम्बं करोषि ? शीघ्रं हेमलतायाः पार्श्वे उपविश।

सुहासः – आर्ये का क्रीडा ? कः नियमः ?

आचार्या – शृण्वन्तु, अहम् एकं शब्दं वदामि। तस्य शब्दस्य प्रत्यक्षरं शब्दः वक्तव्यः। उक्तं शब्दं पुनः मा वदन्तु। ज्ञातं खलु ?

रवीन्द्रः – क्रीडायाः नाम वदतु आर्ये।

आचार्या – क्रीडायाः नाम 'प्रत्यक्षरपदकथनम्'। 'गिरिजावल्लभः' इति शब्दः। वदतु प्रदीप ! 'गि' इति प्रथमाक्षरम्।

प्रदीपः – राकेशः प्रथमं वदतु। ततः आरम्भः भवतु आर्ये।

आचार्या – भवतु, राकेश ! वद त्वं शीघ्रम्।

राकेशः – गिरिः

चन्द्रः – रिपुः

स्नेहा – जानकी...।

प्रदीपः – नस्त्रम्।

सुजाता – लाभः।

राकेशः – भल्लुकः।

आचार्या – इदानीम् अवगतवन्तः खलु। प्रदीप एकं शब्दं वदतु। तस्य शब्दस्य प्रत्यक्षरं एकः शब्दः इति सर्वे वदन्तु क्रीडन्तु। अहमिदानीमेव आगच्छामि।

अधिकं प्राप्तवान्

चतुर्थी, क्तक्तु

रामगोपालः – विवाहकार्यक्रमः समाप्तः किम् ?

मधुकरः – विवाहः समाप्तः। मम कोषः अपि रिक्तः।

रामगोपालः – किमर्थम् ? तावत् किं कृतवान् ?

मधुकरः – विवाहसमये अहं जनकाय यानपेटिकां दत्तवान्। अम्बायै नूतनं कण्ठहारं दत्तवान्। अनुजाय घटीं दत्तवान्।

रामगोपालः – अनुजायै किं दत्तवान् ?

मधुकरः – अनुजायै अहं स्वर्णमयीं लेखनीं दत्तवान्। एतावदेव न, मम मातुलाय कौशेयवस्त्राणि, मातुलान्यै कौशेयशाटिका...। एवं बहुविधाः व्ययाः।

रामगोपालः – विवाहसमये श्वसुरः भवते किं दत्तवान् ?

मधुकरः – अहं तु वरदक्षिणां न स्वीकृतवान्। किन्तु अहम् अमेरिकायाम् अस्मि इतिकारणतः सः मह्यं कारयानं, सुवर्णहारम्, एकां घटीम् उत्तमानि वस्त्राणि, अन्यविधानि कानिचन वस्तूनि च दत्तवान्।

रामगोपालः – भवतः पत्न्यै शालिन्यै अपि दत्तवान् स्यात्।

मधुकरः – सा तस्य एका एव पुत्री। अतः तस्यै अपि प्रभूतं दत्तवान्।

राम ालः – तर्हि भवतः कोषः पुनः पूर्णः स्यादेव।

मधुकरः – अहम् एकः एव व्ययं न कृतवान्। मम पिता अपि व्ययार्थं धनं दत्तवान्।

रामगोपालः – तथापि चिन्तां न करोतु। अन्येभ्यः यावत् दत्तवान् ततोऽपि अधिकं प्राप्तवान् अस्ति।

चित्ररचना

यत्-तत्, द्वितीया-तृतीया

शिक्षकः – भो ! अहं कृष्णफलके बहूनि चित्राणि लिखामि। भवन्तः तत् दृष्ट्वा यत् इच्छन्ति तत् लिखन्तु।

चन्दनः – श्रीमन् ! लेखन्या लिखामि उत अङ्कन्या ? केन लिखामः?

शिक्षकः – अङ्कन्या अपि लेखितुं शक्नुवन्ति। लेखन्या, वर्णलेखन्या, अन्येन केनचित् वा लेखितुं शक्नुवन्ति।

वसुमति – अहं अङ्कन्या लिखामि। पवित्रा लेखन्या लिखति श्रीमन् !

पवित्रा – अहम् अङ्कनीं न आनीतवती। अतः लेखन्या विमानं लिखामि।

अञ्जली – श्रीमन् अहं कूर्चेण शृगालं लिखामि किम् ?

शिक्षकः – लिखतु। यदि शक्नोति तर्हि वर्णमपि योजयतु।

जनार्दनः – अङ्कन्या घटीं लिखामि। राघवः किमपि न लिखति। तूष्णीम् उपविष्टवान् अस्ति सः।

शिक्षकः – किमर्थं राघव ? किम् अभवत् भवतः ?

राघवः – अहम् अङ्कनीं लेखनीं वा न आनीतवान्। कथं लिखानि ?

पुनीतः – मम समीपे द्वे अङ्कन्यौ स्तः। स्वीकरोतु एकाम् अङ्कनीम्।

राघवः – धन्यवादः। श्रीमन् ! अङ्कन्या फलं लिखामि।

शिक्षकः – विंशति निमेषेषु भवन्तः चित्रं रचयित्वा दर्शयन्तु। परस्परं वार्तालापं मा कुर्वन्तु।

यदि ज्वरः तर्हि गुलिके

यथा-तथा, यदि-तर्हि

अखिलः – राजेशः किमर्थम् अद्य कार्यालयं नागतवान् ?

माधुरी – अद्य प्रातः आरभ्य तस्य महान् ज्वरः अस्ति भोः। अतः सः शयनं कृतवान् ?।

अखिलः – किं सः निद्रां कृतवान् ? तस्मै भवती औषधं दत्तवती खलु ?

माधुरी – इदानीं सः औषधं पीत्वा निद्रां कृतवान्। यदा षट्वादनं भवति तदा पुनः औषधं दास्यामि।

अखिलः – यदा उत्तिष्ठति तदा 'अहम् आगतवान्' इति वदतु।

मधुरी – उपविशतु। काफी ददामि। श्वः यदि ज्वरः न्यूनः भविष्यति तर्हि सः कार्यालयम् आगमिष्यति।

अखिलः – मास्तु यदि विश्रान्तिः आवश्यकी तर्हि स्वीकरोतु। अहं कार्यालये वदामि।

माधुरी – यदा ज्वरः भवति, तदा किमपि सः न स्वीकरोति। अतः निःशक्तिः भवति।

अखिलः – अहम् आगच्छामि। तं सूचयतु।

राजेशः – माधुरि ! इदानीं ज्वरः अधिकः अस्ति इति चिन्तयामि, पश्यतु। वैद्यः किम् उक्तवान् ?

माधुरी – यदि ज्वरः अधिकः अस्ति तर्हि गुलिके ददातु इति उक्तवान्। भवान् शयनं करोतु अहं जलम् आनयामि।

संस्कृतसम्भाषणम्

किमर्थम् /कति/कुतः

शिल्पा – भोः ! भवान् सङ्गणकज्ञानं कुतः प्राप्तवान् ?

नरेन्द्रः – अहम् अमेरिकायां सङ्गणकज्ञानं प्राप्तवान्।

शिल्पा – भवान् किमर्थं भारतम् आगतवान् ? भवतः जननीजनकौ कुत्र स्तः ?

नेरन्द्रः – मम जननीजनकौ अमेरिकादेशे स्तः। अहं संस्कृत-शास्त्राणाम् अध्ययनार्थं भारतम् आगतवान्। तत्रापि संस्कृतशास्त्राध्ययनाय प्रथमं संस्कृतसम्भाषणं ज्ञातुमिच्छामि। भवती किम् अधीतवती।

शिल्पा – अहं संस्कृतसाहित्यम् अधीतवती। संस्कृते स्नातकोत्तरपदवीमपि प्राप्तवती। अधुना शोधकार्यमपि करोमि।

नरेन्द्रः – भवती अत्र कति वर्षेभ्यः कार्यं करोति ?

शिल्पा – अहं त्रयोदशवर्षेभ्यः संस्कृतप्रचारकार्यं करोमि।

नरेन्द्रः – अत्र संस्कृताध्ययनाय बहुभ्यः प्रदेशेभ्यः जनाः आगच्छन्ति किम् ?

शिल्पाः – संस्कृताध्ययनाय विदेशेभ्यः अपि प्रतिवर्षम् आगच्छन्ति, तिष्ठन्ति, पठन्ति च।

नरेन्द्रः – ते अत्र आगत्य कथम् अध्ययनं कुर्वन्ति ?

शिल्पाः – ते अत्र आगत्य पठन्ति। किन्तु मन्दगत्या शिक्षणं भवति। यतः ते शीघ्रम् उच्चारयितुं न शक्नुवन्ति। किन्तु मासत्रयं मासचतुष्टयं वा स्थित्वा, सम्यक् ज्ञात्वा गच्छन्ति। अत्रत्येन संस्कृतवातावरणेन अत्यन्तं प्रभाविताः भवन्ति।

नरेन्द्रः – अहं बहून् विषयान् ज्ञातवान्, धन्यवादः। अहमपि संस्कृतसम्भाषणाभ्यासद्वारा संस्कृतशास्त्राणाम् अध्ययनार्थं परिश्रमं करिष्यामि।

बेङ्गलूरुनगरे अनुभवः

द्वितीया बहुवचनम्

सुधीरः – अभिराम ! भवान् बेङ्गलूरुनगरं गत्वा किं किं दृष्टवान् ?

अभिरामः – अहम् पुस्तकापणं गतवान् । तत्र पुस्तकानि दृष्टवान्। कादम्बरीं क्रीतवान्। उपन्यासान् दृष्टवान्।

सुधीरः – तत्र विश्वविद्यालये प्रबन्धकान् दृष्टवान् किम् ?

अभिरामः – विश्वविद्यालये न केवलं प्रबन्धकान्, अपितु बहून् शोधच्छात्रान् दृष्टवान्। अनेकान् लेखान् सङ्गृहीतवान्।

सुधीरः – तत्र प्रसिद्धम् उद्यानं न गतवान् किम् ?

अभिरामः – मध्याह्ने वस्तुसंग्रहालयं गतवान्। तत्र अनेकानि वस्तूनि दृष्टवान्। पुरातनानि आयुधानि दृष्टवान्। मार्गदर्शकान् पृष्टवान्। सायम् उद्यानं गतवान्। तत्र वर्णरञ्जितानि पुष्पाणि दृष्टवान्। पुष्पैः शोभमानाः लताः दृष्टवान्। तृणैः निर्मितानि चित्राणि दृष्टवान्।

सुधीरः – तर्हि बेङ्गलुरुनगरं द्रष्टुम् एकं दिनं न पर्याप्तम्। भवान् तत्र कति दिनानि अटितवान् ?

अभिरामः – दर्शनीयानि स्थानानि बहूनि सन्ति तत्र। किन्तु कार्यभारकारणतः अहं शीघ्रम् आगतवान्।

सुधीरः – पुनः मिलामि, भवतः अनुभवान् वदतु।

किञ्चित् पाठयतु

परितः

अनीता – वत्से ! आगच्छतु, स्थालिकां स्थापयतु। भोजनं सिद्धम्।

पुत्री (राधिका) – अम्ब ! किम् अस्मिन् चषके शर्करा आसीत् ? चषकं परितः पिपिलिकाः सन्ति।

अनीता – अहो ! विस्मृतवती आसम्। चषकं क्षालयित्वा स्थापयतु। अनुजम् अपि आह्वयतु।

पुत्री – दिलीप ! उत्पीठिकां परितः पुस्तकानि स्थापितवान् खलु। सदा भवान् पुस्तकानि अव्यवस्थिततया एव स्थापयति। आगच्छतु भोजनार्थम्।

अनीता – दिलीप ! स्थालिकां परितः मा पातयतु। सम्यक् भोजनं करोतु।

दिलीपः – भगिनि ! 'परितः' शब्दस्य एकं वाक्यं वदतु। विद्यालये मम स्नेहितः मां पृष्टवान्। अहम् एवम् उक्तवान्-'देवालयं परितः प्रदक्षिणं करोमि' इति। एतत् वाक्यम् अशुद्धम् उत शुद्धमस्ति?

राधिका – वाक्यं शुद्धमेव अस्ति। एतादृशानि अन्यानि वाक्यानि यथा–'गृहं परितः प्राकारः अस्ति।' 'दीपं परितः कीटाः सन्ति।' 'शिक्षकं परितः छात्राः सन्ति।'

अनीता – इदानीं मौनेन खादन्तु। अनन्तरं पाठयतु भवती।

दिलीपः – भोजनानन्तरं मम प्रकोष्ठम् आगच्छतु। किञ्चित् पाठयतु।

रम्याप्रदर्शिनी

तृतीया बहुवचनम्

पुत्रः – तात ! अद्य प्रदर्शिनीं द्रष्टुं किं नगरं गच्छाम ?

पिता – प्रदर्शिनी कुत्र आयोजिता अस्ति? किं भवान् स्थलं जानाति ?

पुत्रः – प्रदर्शिनिस्थलम् अहं जानामि। गृहजनाः सर्वे गच्छाम।

पिता – अहं ५-३० वादने मम कार्यं समापयामि। गच्छाम।

मञ्जुला – तात ! पश्यतु, प्रदर्शिनी विविधवर्णरञ्जितैः दीपैः अलङ्कृता अस्ति।

पुत्रः – अन्तः गच्छामः। पश्यतु, दण्डैः विविधविन्यासं कृतवन्तः।

माता – अत्र पश्यतु, शलाकाभिः चित्राणि कृतवन्तः।

पुत्रः – तत्र गच्छाम। एका पाञ्चालिका तस्याः स्नेहितैः सह क्रीडति। अपरां पश्यतु, सखीभिः सह नृत्यति। अन्या बालकैः युद्ध्यति।

पिता – वत्स ! प्रदर्शिनीदर्शनार्थं वयं यत् आगतवन्तः तत् सार्थकम् अभवत्।

माता – प्रदर्शिनी नूतनोपकरणैः सज्जीकृतवन्तः सन्ति। अस्मिन् वर्षे प्रदर्शिनी समीचीना अस्ति।

मञ्जुला – अहो, तत्र पश्यतु अम्ब ! देवीं सम्यक् अलङ्कृतवन्तः सन्ति। अहो, अपूर्वम्। वर्णोपेतैः दीपै, अनेकाभिः मालाभिः, पुष्पैः, फलैः विविधैः शाकैः देव्याः मण्डपः अलङ्कृतः अस्ति। अतः सः द्रष्टॄणां सर्वेषां मनः आकर्षति। प्रथमं तत्र गच्छामः।

माता – सत्यम्, तत्र गच्छाम। कञ्चित्कालं स्थित्वा पश्यामः। पुत्र! भवन्तं प्रदर्शिनीविषयं कः उक्तवान् ?

पुत्रः – मम स्नेहिताः सर्वे दृष्टवन्तः। ते माम् उक्तवन्तः।

पिता – परश्वः रविवासरः खलु ? यदि इच्छन्ति पुनः आगच्छाम। गच्छाम इदानीम्।

अपेक्षाः पूरयिष्यति

चतुर्थी बहुवचनम्

मुख्याध्यापकः – छात्राः ! एका सन्तोषवार्ता अस्ति। यः अस्माकं राज्यस्य मुख्यमन्त्री अस्ति तस्य अद्य जन्मदिनम् अस्ति। सः अतीव दयालुः अस्ति उदारः अपि अस्ति।

छात्राः – श्रीमन् ! ध्वनिवर्धकः सम्यक् नास्ति। अन्ते न श्रूयते।

मुख्याध्यापकः – अस्तु, उच्चैः वदामि। किं श्रूयते इदानीम् ?

छात्राः – आम्, श्रूयते।

मुख्याध्यापकः – सः मुख्यमन्त्रिमहाशयः अस्माकं शालायाः शिक्षकेभ्यः अमूल्यानि वस्त्राणि दत्तवान्। शिक्षिकाभ्यः शाटिकाः दत्तवान्। प्रौढशालायाः छात्रेभ्यः समवस्त्राणि दत्तवान्। प्राथमिक-शालाच्छात्रेभ्यः पुस्तकानि दत्तवान्।

छात्राः – श्रीमन् ! बालेभ्यः सः किं दत्तवान् ?

मुख्याध्यापकः – बालेभ्यः अधिकानि क्रीडासाधनानि दत्तवान् सः। किञ्चित् धनमपि दत्तवान् अस्ति। एतदतिरिच्य अन्यत् किम् अपेक्षितम् इति भवन्तः वदन्तु।

प्रौढच्छात्राः – अस्माकं प्रकोष्ठेभ्यः (कक्ष्याभ्यः) अधिकानि आसनानि आवश्यकानि।

शिक्षिका – बालानां कक्ष्याभ्यः पाठोपकरणानि आवश्यकानि।

शिक्षकः – सर्वेभ्यः बालेभ्यः क्रीडासाधानानि अत्यावश्यकानि।

मुख्याध्यापकः – अस्तु, एताः अपेक्षाः सः पूरयिष्यति प्रायः। पुनः अपि किमपि अपेक्षितं चेत् श्वः सूचन्तु। धन्यवादः।

शिल्पकारः

षष्ठी

पथिकः – भोः शिलां कुट्टयित्वा कुट्टयित्वा भवान् किंवा करोति ?

शिल्पकारः – अहं गणेशस्य विग्रहं करोमि।

पथिकः – किमर्थं भवान् शिवस्य विग्रहं न करोति ? किं भवान् गणेशस्य भक्तः ?

शिल्पकारः – शिवस्य विग्रहः लिङ्गरूपः, अतः अहं गणेशस्य विग्रहं करोमि।

पथिकः – भवान् सर्वविधान् विग्रहान् अपि करोति किम् ?

शिल्पकारः – भवते कीदृशः विग्रहः आवश्यकः ? देवस्य चेत् कस्य देवस्य? देव्याः चेत् कस्याः देव्याः ? रामस्य लक्ष्म्याः सरस्वत्याः उत कृष्णस्य ? कस्य विग्रहः आवश्यकः ?

पथिकः – नवरात्रसमये पूजां कर्तुं लक्ष्म्याः विग्रहः आवश्यकः। तथैव पार्वत्याः (गौर्याः) विग्रहः अपि आवश्यकः।

शिल्पकारः – भवते कदा आवश्यकम् ?

पथिकः – मह्यं जुलै-मासस्य १० दिनाङ्के आवश्यकम्। कृत्वा ददाति किम् ? एकस्य विग्रहस्य कृते कति रूप्यकाणि ?

शिल्पकारः – देव्याः इति कारणतः कति रूप्यकाणि इति न वदामि। भवानेव चिन्तयित्वा ददातु।

पथिकः – अस्तु जुलै-मासस्य १० दिनाङ्के आगच्छामि।

पीतवर्णः

षष्ठी

दिव्या – माले ! आगच्छति वा ? आपणं गच्छाव।

माला – आगच्छामि, गच्छाव। कस्य आपणं गच्छाव ?

दिव्या – प्रथमं पादरक्षायाः आपणं गच्छाव। अहो... तत्र एकः आपणः अस्ति।

आपणिकः – कस्याः कृते पादरक्षा ?

दिव्या – मम कृते एव। तां पीतवर्णां पादरक्षां ददातु। कतिरूप्यकाणि?

आपणिकः – एतस्याः कृते १५० रूप्यकाणि। कृष्णवर्णपादरक्षायाः न्यूनं मूल्यम्।

दिव्या – पीतवर्णां पादरक्षां दर्शयतु।

माला – पादरक्षायाः मूल्यम् अधिकम् अस्ति भोः। एषा मास्तु।

दिव्या – नैव, मम अम्बा पीतवर्णस्य वस्त्रम् आनीतवती। अतः पीतवर्णपादरक्षा आवश्यकी। भवतु आगच्छतु। कङ्कणस्य आपणं। गच्छामः।

माला – आगच्छतु, किं? कङ्कणानि अपि पीतवर्णयुतानि एव आवश्यकानि वा?

दिव्या – आम् सत्यम्। आगामि अगस्तमासस्य चतुर्थे मम मातुलस्य विवाहः भविष्यति। तदा पीतवर्णस्य वस्त्रम्, पीतवर्णस्य कङ्कणम्, पीतवर्णस्य तिलकं, पीतवर्णस्य पादरक्षां च धरिष्यामि। सर्वाणि अपि पीतवर्णस्य एव भविष्यन्ति।

माला – तर्हि अहम् एकम् उपायं वदामि किम् ?

दिव्या – वदतु, वदतु ?

माला – भवत्याः मातुलस्य विवाहपर्यन्तं दन्तधावनं मा करोतु। तदा भवत्याः दन्ताः अपि पीतवर्णाः भवन्ति।

मम पतिः भोः !

एव

विमला – अश्विनि ! पाकः सिद्धः किम् ?

अश्विनी – भोः ! अद्य जलमेव नासीत्। भवत्याः.....

विमला – मम अद्य पाककार्यमेव नास्ति। अद्य वयं विवाहं गच्छामः। किन्तु मम पतिः कार्यालयतः न आगतवान् एव।

अश्विनी – भवत्याः पुत्री सङ्गीतकक्ष्यां न गच्छति किम्?

विमला – सा सङ्गीतं न इच्छति एव। भवत्या किमर्थं सङ्गीतकक्ष्यागमनं पृष्टम्?

अश्विनी – अद्य सा किमपि गीतवती। अहं तत् श्रुतवती। सा सम्यक् गायति। अतः अहं चिन्तितवती एषा सङ्गीतकक्ष्यां गच्छति इति।

विमला – अश्विनि ! अद्य प्रातःकाले एव कोऽपि भवत्या सह सम्भाषणं करोति स्म खलु ? कः सः ?

अश्विनी – अद्य प्रातः अहम् अन्येन केनापि सह सम्भाषणं न कृतवती एव। तदस्तु, भवत्या दृष्टः सः कथम् अस्ति ?

विमला – सः उन्नतः उपनेत्रधारी, श्वेतः.....

अश्विनी – सः ! सः एव मम पतिः भोः।

विमला – एवं वा ! दूरात् अहम् अन्यः कोऽपि नूतनः इति चिन्तितवती।

देहलीदर्शनम्

लङ्

रामचन्द्रः – कदा आगच्छत् देहलीतः ?

चेतनः – ह्यः एव आगच्छम्।

रामचन्द्रः – प्रयाणं सुखकरम् आसीत् किम् ?

चेतनः – प्रयाणं तु सुखकरम् आसीत्। १० दिनाङ्के प्रातः एव प्राप्नुवम्। स्नेहितः निस्थानम् आगच्छत्। तेन सह अगच्छम्।

रामचन्द्रः – देहलीनगरे किं किम् अपश्यत् ?

चेतनः – कुतुबमीनारम् अपश्यम्। सुन्दरम् अस्ति। मार्गदर्शकः विवरणम् अकरोत्।

रामचन्द्रः – राष्ट्रपतिभवनं न अपश्यः किम् ?

चेतनः – तत्तु अपश्यम्। बहु विशालम् अस्ति।

रामचन्द्रः – भोजनार्थं किम् अकरोः ?

चेतनः – आवां कमलमन्दिरं द्रष्टुं बहुदूरम् अगच्छाव तत्रैव समीपे दक्षिण-भारतीय-उपाहार मन्दिरम् अस्ति तत्र भोजनार्थम् अगच्छाव। रोटिकाः, ओदनं, च अखादाव। बहु स्वादिष्टम् आसीत्।

रामचन्द्रः – देहलीतः किम् आनयः।

चेतनः – किमपि न आनयम्। रविवासरः इति सर्वे आपणाः पिहिताः आसन्।

रामचन्द्रः – तव स्नेहितोऽपि निस्थानम् आगच्छत् वा ?

चेतनः – नैव, तस्य सङ्गणककार्यम् अस्ति इति तथैव अगच्छत्। गमन-समये बहूनि फलानि अपि अयच्छत्।

वार्षिकोत्सववर्णनम्

नैव/अपि/सम्यक्

पत्नी – ह्यः वयं विद्यालयस्य वार्षिकोत्सवं गतवत्यः।

पतिः – कार्यक्रमः कथम् आसीत् ?

पत्नी – सम्यक् आसीत्। परं किञ्चित् दीर्घः कार्यक्रमः आसीत्।

पतिः – के के कार्यक्रमा आसन् ?

पत्नी – नूतनानां कार्यक्रमाणाम् आयोजनं कृतवन्तः। राजस्थानी-गीतस्य नृत्यं बालिकानाम् आसीत्। बालकानाम् हिन्दी-गीतस्य नृत्यम् आसीत्।

पतिः – केवलं नृत्यम् आसीत् किम् ?

पत्नी – नैव, शिक्षकाणां संस्कृतनाटकम् आसीत्। ते सम्यक् न कृतवन्तः। जनाः अपि अर्थम् अज्ञात्वा कोलाहलं कृतवन्तः।

पतिः – बालकानां नाटकं न आसीत् वा ?

पत्नी – नैव, आरम्भे एव युवतीनाम् स्वागतनृत्यम् आसीत्। अपरः कार्यक्रमः अतिविशिष्टः।

पतिः – कः कार्यक्रमः ?

पत्नी – 'पञ्चभूतानां मेलनं इति' प्रथमं, भूमिः, आकाशः, पवनः, पावकः, जलम्-एतेषां पृथक् नृत्यम्। अनन्तरं सर्वेषां मिलित्वा नृत्यम्। मध्ये मध्ये सम्भाषणम्-इत्युक्ते नृत्यरूपकम् आसीत्।

पतिः – कार्यक्रमस्तु सम्यक् आसीत्। तथैव अलङ्काराः अपि आसन् किम् ?

पत्नी – दीपानाम् अलङ्कारः, ध्वनिवर्धकानां, पुष्पाणां, फलानां-इत्यादिनां बहुविधाः अलङ्काराः आसन्।

यात्राचिटिकारक्षणम्

अस्/नी/लोट्

प्रबन्धकः – महेश ! अद्य आरक्षणार्थं रेलयाननिस्थानकं गच्छतु। द्वयोः हरिद्वारगमनाय यात्राचिटिकाम् आनयतु।

महेशः – आर्य ! अद्य मया सह बालाचार्यः अपि आगच्छति। आवां ततः शिवाजीनगरं गच्छावः।

प्रबन्धकः – अद्य कार्यालयकार्यं नास्ति वा ? कदा आगच्छतः ?

महेशः – रात्रौ आगच्छावः।

प्रबन्धकः – शिवाजीनगरे कः अस्ति ? बालाचार्यं किमर्थं नयति ?

महेशः – शिवाजीनगरे मम भगिनी अस्ति। मम भगिनी बालाचार्यस्यापि बन्धुः। अतः सा उक्तवती–बालाचार्यमपि आनयतु इति। अतः तत्र गच्छावः।

प्रबन्धकः – तत्र कोऽपि विशेषः अस्ति किम् ?

महेशः – मम आवुत्तस्य किञ्चित् 'अस्वास्थ्यम्' इति। अतः तत्र गत्वा तं दृष्ट्वा आगच्छावः।

प्रबन्धकः – भवतु, कार्यविषये चिन्तयताम्। शीघ्रं गत्वा आगच्छताम्।

परीक्षायै सज्जता

सप्तमी बहुवचनम्

शिक्षकः — छात्राः ! परीक्षा सन्निहिता अस्ति। सम्यक् पठन्तु।

अनन्तः — परीक्षा कुत्र प्रचलिष्यति ?

शिक्षकः — सर्वेषु प्रकोष्ठेषु (कक्ष्यासु) क्रमसंख्यां स्थापयामः। परीक्षा अस्माकं विद्यालये एव भविष्यति। इदानीं सर्वे अपि छात्राः बहिः गच्छन्तु।

अनन्तः — किमर्थम् आचार्य ! अद्य एव संख्यां स्थापयन्ति किम् ?

शिक्षकः — इदानीं भवन्तः सर्वेषु प्रकोष्ठेषु स्वच्छतां कुर्वन्तु। उत्पीठिकासु अपि धूलिं मार्जयन्तु। कृष्णफलकेषु अपि धूलिं मार्जयित्वा दिनाङ्कादिकं लिखन्तु।

राजीवः — आचार्य ! सर्वेऽपि कार्यं न कुर्वन्ति। केचन बहिः अटन्ति।

शिक्षकः — बालकेषु एकं प्रमुखं करोमि। बालिकासु एकां प्रमुखां करोमि, यदि क्रीडाङ्गणेषु क्रीडन्ति तर्हि दण्डम् आनयामि। केचन द्रोणीषु जलं पूरयित्वा आनयन्तु।

मालती — मार्जनार्थं वस्त्राणि कुत्र सन्ति ?

शिक्षकः — वस्त्राणि वस्तुसङ्ग्रहप्रकोष्ठे सन्ति। तत्र गत्वा आनयन्तु।

छात्राः — आचार्य ! वयं गच्छामः। सज्जतां कुर्मः।

कार्यकर्तृगृहम्

सप्तमी बहुवचनम्

मालती – अद्य शीघ्रम् आगच्छतु। विजयनगरं गच्छावः।

दिलीपः – विजयनगरे कः विशेषः ?

मालती – अद्य एव खलु सन्ध्यायाः विवाहः ? अतः शीघ्रं गच्छावः।

दिलीपः – अद्य कार्यालये बहुकार्याणि सन्ति। केशवकृपायां मन्थन-कार्यक्रमः। अतः विवाहगमनं न भवेत्।

मालती – भवतः सर्वदा कार्यालये कार्याणि भवन्ति। रविवासरे अपि विरामः नास्ति। कुत्रापि गमनम् एव न भवति।

दिलीपः – मालति ! खेदः मास्तु। कार्यालये १०वादने सीमायाः पाठः अस्ति। अतिथिगृहे दीपव्यवस्था, सभाङ्गणे कार्यक्रमस्य व्यवस्था, कपाटिकायां पुस्तकानां योजनं, ग्रन्थालये आसन्दानां व्यवस्थापनं, पत्रिकां नीता मुद्रणालये द दान तन्मध्ये राजाजिनगरे कार्यकर्तृगोष्ठी-निर्वहणम्-इत्यादीनि कार्याणि सन्ति। अत्र किं कार्यं परित्यजामि।

मालती – अन्ये कार्यकर्तारः न सन्ति वा ?

दिलीपः – सुरेशः लखनऊ गतवान्, नारायणः कोलकतानगरं गतवान्। ते त्रयः शिविरं गच्छन्ति। पुनः के सन्ति ?

मालती – किमपि करोतु।

उदरवेदना

ह्यः/परह्य/श्वः/परश्वः आरभ्य

रोगी – महाभाग ! महती उदरवेदना अस्ति। किमपि औषधं ददातु।

वैद्यः – उद्वेगः मास्तु। कदा आरभ्य उदरवेदना ?

रोगी – ह्यः आरभ्य उदरवेदना, मुखे रुचिः एव नास्ति।

वैद्यः – ह्यः कुत्र गतवान्, किं किं खादितवान् ?

रोगी – परह्यः मातुलस्य गृहं गतवान्। तत्र सा मधुरं कृतवती। अहं यथेष्टं खादितवान्।

वैद्यः – चिन्ता मास्तु, अहम् औषधं ददामि।

रोगी – किञ्चित् शिरोवेदना अपि अस्ति। बुभुक्षा एव नास्ति। मुखे रुचिः अपि नास्ति।

वैद्यः – भवतः अजीर्णं जातम्। श्वः, परश्वः निमित्तम् औषधं ददामि। प्रपरश्वः पुनः आगच्छतु।

रोगी – श्वः आहारं किं स्वीकरोमि ?

वैद्यः – श्वः परश्वः, प्रपरश्वः घनाहारंवः घनाहारं न अधिकं द्रवाहारं स्वीकरोतु।

रोगी – अस्तु, प्रपरश्वः पुनः आगच्छामि। कति रूप्यकाणि।

वैद्यः – प्रथमवारम् इति ५० रूप्यकाणि ददातु। प्रपरश्वः चेत् २५ रूप्यकाणि एव !

यात्रावर्णनम्

क्तवतु द्विवचन प्रयोगः

शारदा – किं दर्शनमेव नासीत् भवतोः ?

पङ्कजा – आवां दशदिनानि न आस्व। उत्तरभारतप्रवासार्थं गतवन्तौ। त्वं किं मम गृहं आगतवती आसीत् ?

शारदा – अहं भवत्याः गृहं द्विवारम् आगतवती आसम्। परं भवन्तौ न आस्ताम्। कुत्र कुत्र गतवन्तौ ? किं किं दृष्टवन्तौ ?

पङ्कजा – आवाम् इतः वाराणसीं गत्वा विश्वनाथस्य दर्शनं कृतवन्तौ। वाराणसीतः प्रयागं गतवन्तौ। प्रयागतः मथुरां गतवन्तौ। मथुरातः वृन्दावनं गतवन्तौ।

शारदा – वृन्दावने गिरिजा मिलितवती वा ?

पङ्कजा – आम् ! वृन्दावने गिरिजा मिलितवती। आवां द्वौ अपि तस्याः गृहं गतवन्तौ। सायं अहं गिरिजा च आपणं गतवत्यौ। मम पतिः गिरिजायाः गृहे एव आसीत्। अनन्तरदिने पुनः वृन्दावनतः अयोध्यां गतवन्तौ। तत्र श्रीराममन्दिरं गत्वा पुनः वाराणसीं गतवन्तौ।

शारदा – किमर्थं पुनः वाराणसीं गतवन्तौ ?

पङ्कजा – मम पतिः पुनः विश्वनाथदर्शनं कृत्वा गच्छावः इति उक्तवान्। अतः पुनः वाराणसीं गत्वा आगतवन्तौ।

शारदा – अरे ! महती यात्रा ननु ?

पङ्कजा – आम्, अतः दशदिनेभ्यः गृहे अव्यवस्था। त्वं गमनसमये प्रसादं नय।

स्वादिष्टं भोजनम्

भोजनसम्बन्धिशब्दाः

पुत्रः – अम्ब ! महती बुभुक्षा भवति। शीघ्रं भोजनं परिवेषयतु।

अम्बा – वत्स ! भोजनार्थं सर्वान् आह्वयतु।

पुत्रः – सर्वे शीघ्रम् आगच्छन्तु।

अम्बा – अद्य ओदनम्, सारः, व्यञ्जनं, क्वथितं, पर्पटः पायसम् च अस्ति।

पुत्रः – अद्य कः विशेषः ?

अम्बा – अद्य रामनवमी भोः। अतः पायसं कृतवती।

भगिनी – अम्ब अद्य व्यञ्जने लवणमेव न योजितवती। लवणं परिवेषयतु।

अम्बा – अहो विस्मृतवती। स्वीकरोतु लवणम्।

पुत्रः – अम्ब ! सारः कटुः अस्ति घृतम् आवश्यकम्।

पतिः – जलजे ! क्वथितं परिवेषयतु। वृन्ताकस्य खलु क्वथितम् अतः खण्डाः मा सन्तु।

अम्बा – वत्स ! पायसं कथमस्ति ?

पुत्रः – पायसं बहु स्वादिष्टम् अस्ति।

भगिनी – पायसं रुचिकरं परं तक्रम् आम्लम् अस्ति। मम अवलेहः आवश्यकः।

पतिः – तथैव जलमपि आवश्यकम्। अद्य व्यञ्जनं कोऽपि न खादति। यतः तत्र लवणमेव नास्ति।

अम्बा – सावधानं भोजनं कुर्वन्तु। किम् आवश्यकम् ?

भगिनी – अद्य भोजनं तावत् सम्यक् नासीत्।

पुत्रः – नहि अम्ब ! भगिनी असत्यं वदति। भोजनम् अतीव स्वादिष्टम् आसीत्।

आम्रशलाटुकर्त्तनम्

शक्नोति-शक्नुवन्ति

स्वामी – शिव ! सोम ! राम ! अत्र आगच्छन्तु। एते आम्रशलाटवः आवश्यकाः। कः कर्त्तयितुं शक्नोति ?

रामः – अहं तु न शक्नोमि। सोमः, शिवः वा शक्नुयात्।

सोमः – अहम् अपि न शक्नोमि। शिवः अपि न शक्नुयात् ?

स्वामी – तर्हि तान् वृक्षात् उत्पाटयितुं कः शक्नोति।

सोमः – मम गृहपार्श्वे गङ्गारामः इति एकः अस्ति। सः एतादृशकार्ये अतीव चतुरः अस्ति। सः उत्पाटयितुं शक्नुयात्।

स्वामी – अहं तु न शक्नोमि, भवन्तः अपि न शक्नुवति। तर्हि तं गङ्गारामं सूचयतु। कः सूचयति ?

शिवः – अहं तं सूचयितुं शक्नोमि।

रामः – तत्तु निश्चयेन शक्नोति एव।

स्वामी – श्वः तत् कार्यं समापयन्तु। सः तु वृक्षात् उत्पाटयति। तान् गृहम् आनेतुं शक्नुवन्ति खलु ?

सोमः – तत्तु निश्चयेन शक्नुमः।

स्वामी – सोम ! शृण्वन्तु, अहं एकसप्ताहं नगरे न भवामि। अतः किं किं कार्यं समापयितुं शक्नुवन्ति इति चिन्तयन्तु।

युवकमण्डले सम्मानः

इव

सतीशः – किं भोः, मन्त्री इव विलम्बेन आगच्छति ?

देवराजः – क्षम्यताम्, विलम्बः अभवत्।

सतीशः – गजः इव मन्दं चलित्वा आगतवान् वा ?

देवराजः – अहं किं करवाणि ? अहं नगरयानेन आगतवान्। तत्यानं कूर्मः इव मन्दं चलति स्म।

सतीशः – पानीयं किमपि अपेक्षितं वा ? अथवा केवलं जल्पति ?

देवराजः – भवान् कृपणः इव वचनेन एव समापयति वा अथवा किमपि खादितुम्.....।

सतीशः – किं रे बकासुरः इव सदा खादितुम् इति वदति। भवतु, आगमनकारणं निवेदयतु। अम्ब ! देवराजः आगतवान्। खाद्यम् आनयतु...।

देवराजः – अस्माकं स्नेहितः वादिराजः अस्ति खलु। सः कालिदासः इव काव्यं लिखति। शारुहखान इव अभिनयति। हरिवंशराय बच्चनः इव लेखं लिखति। नरेन्द्रकोहली इव उपन्यासं लिखति। एवं बहु प्रसिद्ध अस्ति इति।

सतीशः – तर्हि किं कुर्मः इति वदति।

देवराजः – तम् अस्माकं युवकमण्डले सम्मानयामः किम् ?

सतीशः – युवकमण्डले चर्चयामः अन्ये अङ्गीकुर्वन्ति चेत् ममापि अङ्गीकारः एव। भवान् तस्य विषयम् उपस्थापयतु।

देवराजः – अस्तु। तर्हि श्वः मेलिष्यामि।

क्षम्यताम्

इति

अग्रजा – हो, हो भवान् वा ? आगच्छतु, आगच्छतु।

रविः – आम् अहमेव। मां कः ? इति चिन्तितवती भवती ?

अग्रजा – भवन्तं एकः महामार्जारः इति चिन्तितवती। निःशब्दं, अकस्मात् भवान् आगतवान् खलु ?

रविः – असत्यं मा वदतु भवती मां महाचोरः इति, अपरिचितः दृष्टः, इति, चिन्तितवती ननु ?

अग्रजा – नैव, भवन्तं महाव्याघ्रः इति चिन्तितवती।

रविः – भोः तदर्थं कोपः मास्तु। अहमपि विनोदं कृतवान्। भवतु, सद्यः मां भवत्याः प्रियानुजः इति चिन्तयतु।

अग्रजा – एवं विनोदशीलः इत्येव मम गृहे भवान् बहुप्रियः अभवत् परं भवतः अहङ्कारः, गर्वः,...

रविः – अग्रजे ! अद्य भवत्याः किम् अभवत् इति। पदे पदे कुपिता भवति खलु ?

अग्रजा – सत्यं भोः। अग्रजा इति, आवुत्तः इति वा भवतः प्रीतिः अस्ति वा ? एकं पत्रं लिखितवान् किम् ? अन्ततोगत्वा एकां दूरवाणीं...?

रविः – क्षम्यताम्.....क्षम्यताम्..... पादयोः पतामि। आवुत्तः कदा आगच्छति? भवती एव मां रक्षतु। भवतीं शरणं गच्छामि।

मित्रसाहाय्यम्

तुमुन्/क्तवतु

नवीनः – तपनः आगतवान् आसीत्। श्वः प्रातःकाले आगमिष्यामि इति उक्त्वा गतवान्।

भास्करः – भवान् उपविशतु इति न उक्तवान् किम् ?

नवीनः – अहम् उक्तवान् तथापि सः गतवान्। तस्य मुखे खेदः आसीत्।

भास्करः – सः एकम् उद्योगं प्राप्तुम् इच्छति। किन्तु तत्रत्य अधिकारी उत्कोचम् इच्छति। एषः तपनः कथं धनं दातुं शक्नोति ?

नवीनः – अतः एव मां किमपि न उक्तवान्। भवान् नास्ति इति श्रुत्वा तथैव निर्गतवान्।

भास्करः – अहं श्वः अपि प्रातः एव गमिष्यामि। सः आगच्छति चेत् एतत् धनं ददातु। अनन्तरं दूरवाणीं कर्तुं वदतु।

नवीनः – तपनः गृहे प्रष्टुं न शक्नोति वा ?

भास्करः – तपनस्य गृहे अपि तावद् धनं दातुं समर्थाः न। तेषां मध्यमस्तरीय-कुटुम्बः। तिस्रः भगिन्यः अपि सन्ति। एषः एकः एव पुत्रः। कुटुम्बपोषणमपि कष्टमेव।

नवीनः – तपनस्य भवतः च कथं परिचयः।

भास्करः – तपनस्य पिता, मम पिता च स्नेहितौ। अहमपि तयोः स्नेहसम्बन्धं रक्षितुम् इच्छामि। तपनः अतीव विधेयः युवकः, गुणी च।

परिचयपाठः

षष्ठी-भवत्यः, भवत्याः, मम

आचार्यः – सर्वेभ्यः स्वागतम्। नमस्काराः। मम नाम शम्भुनाथः। भवतः नाम किम् ?

श्रीधरः – मम नाम श्रीधरः।

आचार्यः – भवत्याः नाम किम् ?

पूनम – मम नाम पूनम्।

आचार्यः – अरविन्द ! भवतः जनकस्य नाम किम् ?

अरविन्द – मम जनकस्य नाम गिरीशः।

आचार्यः – श्रीधर ! अत्र आगच्छतु ! अहं भवतः नासिका इति वदामि। भवान् मम नासिका इति वदतु। भोः छात्राः भवन्तः श्रीधरस्य नासिका इति वदन्तु।

आचार्यः – भवतः कर्णः

श्रीधरः – मम कर्णः

छात्राः – श्रीधरस्य कर्णः

आचार्यः – भवतः, पादः भवतः हस्तः, भवतः शिरः, भवतः वदनम्... इत्यादि।

श्रीधरः – मम पादः, मम हस्तः..... मम शिरः, ... मम वदनम्....।

आचार्यः – श्रीधरस्य पादः, श्रीधरस्य हस्तः श्रीधरस्य शिरः, श्रीधरस्य वदनम्.....।

आचार्यः – भवत्याः पुस्तकम्..... एवमेव।

लता – मम पुस्तकम्।

छात्राः – लतायाः पुस्तकम् लतायाः लेखनी...।

आचार्यः – भगिनी-गृहम् इति वदामि, परिष्कारं कुर्वन्तु।

छात्राः – भगिन्याः गृहम्।

आचार्यः – गृहं-चित्रम् इति वदामि।

छात्राः – गृहस्य चित्रम्।

आचार्यः – अहम् उत्तराणि वदामि-भवन्तः प्रश्नान् वदन्तु।

आचार्यः – मम नाम गिरीशः।

छात्राः – भवतः नाम गिरीशः।

आचार्यः – पुस्तकस्य नाम बालसरिता।

छात्राः – पुस्तकस्य नाम किम् ?

आचार्यः – श्वः पुनः एतस्य पाठं कुर्मः।

क्रीडा अपि आवश्यकी

लृट्/सम्बोधनम्

माता – पुत्र ! भवान् एवं सदा क्रीडति चेत् उत्तीर्णः न भविष्यति। ज्ञानमपि न प्राप्स्यति।

अमरः – अम्ब ! किमर्थं तथा वदति ? अहं केवलं न क्रीडिष्यामि। अनन्तरं पठिष्यामि।

माता – गृहसदस्याः सर्वे वदन्ति यत् भवान् सर्वदा क्रीडति। न पठिष्यति इति।

अमरः – अहं सर्वदा क्रीडामि। किन्तु कदापि अनुत्तीर्णः न भविष्यामि। भवत्याः चिन्ता मास्तु। पश्यतु गतमासस्य परीक्षफलितांशम्।

माता – वत्स ! एतत् अङ्कपत्रं भवतः एव वा ?

अमरः – सत्यम् अम्ब ! भवत्याः मयि विश्वासः नास्ति यतः सर्वदा अहं क्रीडिष्यामि इति ननु। कक्ष्यायाम् अहमेव प्रथमं स्थानं प्राप्तवान्।

माता – अस्तु, इतः परं भवान् क्रीडतु। अहं चिन्तां न करिष्यामि एव।

अमरः – अम्ब ! मम शिक्षकः वदति। जीवने पठनमेव प्रधानं न, क्रीडा अपि तदा तदा आवश्यकी। क्रीडति चेत् शक्तिवर्धनं भविष्यति, सदा मनः उल्लसितं भविष्यति। बुद्धिविकासः भविष्यति। अतः क्रीडा अपि प्रधाना इति।

माता – भवतु पुत्र ! भवान् उत्तमः भवतु इत्येव मम आशयः।

मातुलः आगमिष्यति

अव्ययानि

पुत्री – अम्ब ! अम्ब ! मातुलः नागपुरतः आगच्छति।

अम्बा – वत्से ! मातुलस्य आगमनं कः सूचितवान् ?

पुत्री – अम्ब ! तातः उक्तवान्–अद्य मातुलः आगच्छति इति। मातुलः आगच्छति चेत् किं किं करोति ?

अम्बा – प्रथमं सः आगच्छतु। अनन्तरं किमपि करोमि।

पुत्री – तातः असत्यं वदति वा ? किमर्थम् एवं वदति भवती ?

अम्बा – नैव वत्से ! तातः असत्यं न वदति। किन्तु भवत्याः मातुलः उक्ते दिने नागच्छति। अतः तथा उक्तवती।

पुत्री – अद्य मातुलः नागच्छति चेत् पुनः कदापि तेन सह सम्भाषणं न करोमि।

अम्बा – किमर्थं पुत्री तावती निरीक्षा वा ? पश्यतु, बहिः तातेन सह कोऽपि सम्भाषणं करोति।

पुत्री – अम्ब ! मातुलः आगतवान्। माम ! आगच्छतु मम क्रीडासाधनानि दर्शयामि। कति वर्षाणि अभवन्। किम् अस्माकं स्मरणं न भविष्यति ?

पिता – वत्से ! किम् एकेन श्वासेन एव सर्वं वदति ? प्रथमं मातुलाय पानीयं ददातु।

अम्बा – अहो ! अद्य पूर्वदिशि सूर्योदयः जातः किम्।

मातुलः – सूर्योदय पूर्वदिशि एव। दिवाकरः तु भवतां पुरतः उपस्थितः।

निश्चिन्ता भविष्यामि

द्विवचन प्रयोगाः

शालिनी – लतिके ! किं करोति गृहे। भवती तु सदा कार्ये मग्ना भवति।

लतिका – किं करोमि। गृहिण्याः विरामः नास्ति खलु ?

शालिनी – वदतु किं वक्तुम् इच्छति। अद्य कार्यालयस्य विरामः वा ?

लतिका – अतः एव एवम् आगतवती भवत्याः पुत्रः कथं पठति।

शालिनी – मम पुत्रः सम्यक् एव पठति। अहं तु तं पाठयामि। स्वयमेव पठति। तं पठतु इत्यपि न वदामि।

लतिका – अहो ! भाग्यशालिनी भवति ! मम पुत्रौ तु न पठतः एव। निरन्तरं क्रीडतः, अहं तु दिने न भवामि। तयोः पाठने मम समयोऽपि नास्ति। ह्यः तयोः शिक्षिका भवतां पुत्रौ अध्ययने रुचिं न दर्शयतः गृहे भवन्तः एतद्विषये समुचितं चिन्तयन्तु पठने रुचिं तयोः उत्पादयन्तु इति पत्रं प्रेषितवती- किं करोमि इति महती चिन्ता।

शालिनी – लतिके ! चिन्तां न करोतु। भवत्याः पुत्रयो विषये अहम् उपायं वदामि।

लतिका – कः उपायः ? शीघ्रं वदतु।

शालिनी – भवती धनं दातुं सिद्धा अस्ति चेत् तौ प्रेषयतु। मम प्रतिवेशिनी उत्तमं पाठयति। परं.....

लतिका – परं.... किम् ?

शालिनी – सा प्रतिमासं पाठार्थं एकस्य कृते २०० रूप्यकाणि स्वीकरोति। ये प्रथमस्थानं प्राप्नुवन्ति ते एव अधिकतया तत्र गच्छन्ति।

लतिका – धनविषये चिन्ता नास्ति। सा अङ्गीकरोति चेत् अद्य आरभ्य एव प्रेषयामि।

शालिनी – अस्तु। अहं तया सह भाषणं करिष्यामि भवतीं सूचयिष्यामि।

लतिका – धन्यवादः। अहं मम पुत्रयोः पठनविषये निश्चिन्ता भविष्यामि।

सः वा ?

कः/खलु/क्तवतु

पत्नी – भवान् कदा आगतवान् ?

पतिः – किमर्थं भोः तथा पृच्छति। इदानीमेव आगतवान्।

पत्नी – रविशङ्करः आगतवान् आसीत्।

पतिः – कः सः रविशङ्करः ?

पत्नी – सः भवन्तं जानाति इति।

पतिः – कः सः, न स्मरामि खलु ?

पत्नी – विशालनेत्रः, द्रष्टुं सुन्दरः, उन्नतोऽपि, श्वेतवर्णीयः। भवतः विषये बहु-बहु श्लाघितवान्। तेन सह तौ द्वौ विदूषकौ इव स्तः खलु ? तौ अपि आगतवन्तौ। ते सर्वेऽपि भवन्तं बहु प्रशंसितवन्तः।

पतिः – तर्हि कः भोः तादृशः। तस्य नाम 'रविशङ्कर' इति सः एव उक्तवान् वा ? अथवा....भवती चिन्तितवती वा ? अन्यत् किम् उक्तवान् ।

पत्नी – तावदपि न जानामि वा ? अहं यत् वदामि तस्य सदा उपहासं करोति भवान् । सः कविसम्मेलने मिलितवान् इति। तत्र भवतः सन्दर्शनमपि दूरदर्शने आयोजयामि इति उक्तवान् इति। अतः दिनाङ्कं निश्चेतुम् आगतवान् आसीत्।

पतिः – सः वा ?

पत्नी – किमर्थं हसति भोः। इदानीं वा ज्ञातवान् खलु।

पतिः – सः रविशङ्करः न भोः उमाशङ्करः। बहुकथकः, कार्यमेकमपि न साधयति।

पत्नी – रविशङ्करो वा, उमाशङ्करो वा कोऽपि शङ्करः एव खलु।

पतिः – अस्तु। अहं तेन सह वार्तां करिष्यामि।

लोकहितं करोतु

स्मप्रयोगः

विनुता – रामलालस्य पत्नी मृता इति। भवती जानाति वा ?

सुमेधा – कदा भोः। तस्याः किम् अभवत् ?

विनुता – ह्यः सायङ्काले मृतवती। तस्याः द्विनद्वयतः ज्वरः आसीत् इति। ह्यः प्रातः आरभ्य हृदयवेदना इति वदति स्म। प्रायः तस्याः पतिः अपि गृहे नासीत् इति।

सुमेधा – अहो कष्टम्.....। सा जलजा तु सम्यक् गायति स्म। बालान् अपि प्रीत्या पाठयति स्म। सर्वदा सौहार्देन व्यवहारं करोति स्म। एवं..... न भवेत् भोः.....

विनुता – किं कर्तुं शक्नुमः। सर्वं दैवलीला.....। ललाटलिखिता रेखा। जलजायाः समीपे कति विद्यार्थिनः पठन्ति स्म।

सुमेधा – जलजायाः समीपे चत्वारिंशत् बालिकाः गच्छन्ति स्म। सा ताः सुमधुरं, सुललितं च पाठयति स्म। तथापि शुल्कम् अधिकं न स्वीकरोति स्म।

विनुता – तादृशाः जनाः इदानीं विरलाः भोः। किञ्चित् किमपि पाठयित्वा अत्यधिकं स्वीकुर्वन्ति।

सुमेधा – अतः एव सा अधिकां वेदनां विना अनायासं मरणं प्राप्तवती स्यात्।

विनुता – सत्यम्। अतः एव वदन्ति-'यावत् जीवति तावत् सुकार्यं करोतु' इति।

मित्रयोः सम्भाषणम्

अपेक्षया

प्रकाशः – मुकुन्द ! पठनं कथं प्रचलति ? कति विषयान् समापितवान्?

मुकुन्दः – ह्यः द्वौ विषयौ समापितवान्। भवतः अपेक्षया मम पठनं न्यूनम् एव। पठने तावती आसक्तिः नास्ति मम। पठनस्य अपेक्षया अधिकं लिखामि यतः स्मरणे तिष्ठति खलु ?

प्रकाशः – मम गृहं ह्यः बान्धवाः आगतवन्तः। अतः अध्ययनस्य अपेक्षया जल्पनम् अधिकम् अभवत्।

मुकुन्दः – इतिहासशिक्षकस्य अपेक्षया गणितशिक्षकम् अहम् इच्छामि। तस्य पाठनशैली सर्वेषाम् अपेक्षया उत्तमा।

प्रकाशः – भवतां शिक्षकस्य अपेक्षया संस्कृतशिक्षिका रोचकतया पाठयति। वयं तु तस्याः पाठनस्य निरीक्षां कुर्मः।

मुकुन्दः – परं मुख्योपाध्यायः तु सर्वेषां अधिकम् उत्साहं, प्रेरणाञ्च पूरयति। केवलम् अध्ययनस्य अपेक्षया अन्येषु विषयेषु अपि प्रोत्साहं ददाति। अतः एव अन्येषां विद्यालयानाम् अपेक्षया अस्माकं विद्यालयः अत्युत्तमः, आदर्शभूतः च अस्ति।

जनभाषा संस्कृतम्

तुमुन्/शक्नोति

पत्रकारः – संस्कृतभाषां जनभाषां कर्तुं भवन्तः प्रयत्नं कुर्वन्ति। एतेन फलं दृष्टवन्तः वा भवन्तः ?

प्रबन्धकः – निश्चयेन एतस्य फलं सिद्धमेव। सर्वदा संस्कृतभाषया वक्तुम् अनेके इच्छन्ति। संस्कृतसरलम् इति जनाः जानन्ति। देशे संस्कृतं पठितुम् उत्साहं दर्शयन्ति। सर्वत्र जनानां संस्कृतोन्मुखता, संस्कृतस्य आदरः अधिक दृश्यते।

पत्रकारः – संस्कृत-आन्दोलनेन इतोऽपि किं सफलं जातम् ?

प्रबन्धकः – संस्कृतेन व्यवह्रियमाणानां संख्या अधिकाजाता। संस्कृतमेव मातृभाषा अस्ति तादृशाः बालाः सन्ति। संस्कृते इतोऽपि अधिकानि नवीनानि साहित्यानि अपि मुद्रितानि। संस्कृतज्ञाः अपि कार्ये आधिक्येन प्रवृत्ताः।

पत्रकारः – संस्कृतं वयं दशदिनेषु पाठयामः इति भवन्तः वदन्ति तत् शक्यते वा ?

प्रबन्धकः – वयं दशदिनेषु एव संस्कृतपण्डितं न कुर्मः। तेषु संस्कृतोन्मुखतां जनयामः। ते अनन्तरं शास्त्रपर्यन्तमपि पठन्ति।

पत्रकारः – भवतु, भवतां कार्यं यशस्वी भवतु। एतस्य प्रचारार्थं वयमपि तदा तदा प्रसारयामः। तेन अनेके जनाः अत्र सम्पर्कं कर्तुं शक्नुवन्ति।

कार्यक्रमः

करोतेः - प्रयोगः

प्रमुखः – अद्य कार्यक्रमः कथं भोः। कः कः किं किं करोति इति वदतु।

विशालः – आगच्छतु वदामि।

छात्राः – नमस्कारः श्रीमन् ।

विशालः – नमस्कारः। उपविशन्तु। एषा मधुरा, एषा अद्य प्रार्थनां गायति। एतस्याः माता वीणां वादयति।

प्रमुखः – कार्यक्रमस्य निर्वहणं कः करोति...?

विशालः – कार्यक्रमस्य निर्वहणं विशालः करोति। एषः पञ्चमकक्ष्यायां पठति। स्वानुभवं पद्मश्री वदति। सा एतस्याः कक्ष्यायाः प्रमुखा। प्रास्ताविकं भवान् वदतु।

प्रमुखः – किं वदामि भोः.....। अस्तु चिन्तयामि। भवान् अपि सिद्धः भवतु।

विशालः – एतौ द्वौ दूरवाणी-सम्भाषणं कुरुतः। एते द्वे बालिके विज्ञापिकां कुरुतः। सः राजेशः एकपात्राभिनयं करोति। तौ किं कुरुतः इति न जानामि।

प्रमुखः – पृच्छतु भोः भवन्तौ किं कुरुतः ?

वीरकः – आवां एकं ऐन्द्रजालं प्रदर्शयावः।

नन्दीश – मम मित्रं वन्दनार्पणं करोति।

प्रमुखः – भवतु। सर्वे मिलित्वा कार्यक्रमस्य यशस्विता यथा स्यात् तथा कुर्वन्तु।

माता-पुत्रयोः सम्भाषणम्-II

क्त्वा

माता – प्रदीप ! दुग्धं पीतवान् वा ?

पुत्रः – नैव अम्ब ! तत्रैव अस्ति दुग्धम्।

माता – तर्हि दुग्धं पीत्वा पठतु। तातः स्नानं कृत्वा उपाहारं स्वीकरोति। तावता भवतः स्थानार्थम् अपि जलम् उष्णं भवति।

पुत्रः – तथैव करोमि अम्ब ! तातः शीघ्रं स्नानं कृत्वा कुत्र गच्छति ?

माता – अद्य रामनगरे सङ्गीत-कार्यक्रमः अस्ति इति। अतः तातः शीघ्रं स्नात्वा, पूजां कृत्वा, उपाहारं खादित्वा कार्यक्रमार्थं गच्छति इति।

पुत्रः – अम्ब ! अहमपि विद्यालयतः सायं विलम्बेन आगच्छामि। मित्रस्य जन्मदिनोत्सवः अस्ति। अतः विद्यालयतः मित्रस्य गृहं गत्वा, क्रीडित्वा, नृत्याभ्यासकक्ष्यामपि गत्वा गृहम् आगच्छामि।

माता – तर्हि अहमपि देवालयं गत्वा, सखीं मिलित्वा, सम्भाषणं कृत्वा आगच्छामि।

Teach Yourself Samskrit

पञ्चमी दीक्षा
व्युत्पादिनी

चतुर्थी दीक्षा
काव्यावगाहनी

तृतीया दीक्षा
काव्यावतरणी

द्वितीया दीक्षा
व्यवहारावगाहनी

प्रथमा दीक्षा
व्यवहारावतरणी

संस्कृत स्वाध्यायः

राष्ट्रिय संस्कृत संस्थानम्
नव देहली